Digitized by eGangotri

RRMR
18244



Digitized by eGangotri



Original Text of HYMNS

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ॐ

Page 9

एषायुक्त परावतः सूर्यस्योदयनादधि
शतं रथेभिः सुभगोषा इयं वि यात्यभि मानुषान्

ऋ. 1.48.7

Page 19

आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूयमानः
आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः

ऋ. 2.18.4

Page 34

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम

ऋ. 10.121.1

Page 36

पूर्णः कुम्भोऽधि काल आहितस्तं वै पश्यामो बहुधा नु सन्तः
स इमा विश्वा भुवनानि प्रत्यङ्कालं तमाहुः परमे व्योमन्

अ. 19.53.3

Page 38

नासदासीन्नो सदासीत् तदानीं नासीद्रजो नो व्योमा परो यत्
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्

ऋ. 10.129.1

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास

ऋ. 10.129.2

तम आसीत् तमसा गूळहमग्रेऽप्रकेतं सलिलं सर्वमा इदम्
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिनाजायतैकम्

ऋ. 10.129.3

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 39

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा

ऋ. 10.129.4

तिरश्चीनो विततो रश्मिरेषामधः स्विदासीऽदुपरि स्विदासीऽत्
रेतोधा आसन् महिमान आसन् त्स्वधा अवस्तात् प्रयतिः परस्तात्

ऋ. 10.129.5

को अद्धा वेद क इह प्र वोचत् कुत आजाता कुत इयं विसृष्टिः
अर्वाग्देवा अस्य विसर्जनेनाऽथा को वेद यत आबभूव

ऋ. 10.129.6

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न
यो अस्याध्यक्षः परमे व्योमन् त्सो अङ्ग वेद यदि वा न वेद

ऋ. 10.129.7

Page 41

शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः

ऋ. 7.35.8

Page 42

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्
स भूमिं विश्वतो वृत्वा ऽत्यतिष्ठद्दशांगुलम्

ऋ. 10.90.1

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्
उतामृतत्वस्येशानो यदन्नेनातिरोहति

ऋ. 10.90.2

एतावानस्य महिमा ऽतो ज्यायाँश्च पूरुषः
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि

ऋ. 10.90.3

त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः
ततो विष्वङ् व्यक्रामत् साशनानशने अभि

ऋ. 10.90.4

Page 43

तस्माद्विराळजायत विराजो अधि पूरुषः
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः

ऋ. 10-90.5

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

यत् पुरुषेण हविषा देवा यज्ञमतन्वत
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः
ऋ. 10.90.6

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः
तेन देवा अयजन्त साध्या ऋषयश्च ये
ऋ. 10.90.7

तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यम्
पशून् ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये
ऋ. 10.90.8

Page 44

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत
ऋ.10.90.9

तस्मादश्वा अजायन्त ये के चोभयादतः
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः
ऋ. 10.90.10

यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन्
मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते
ऋ. 10.90.11

Page 46

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत
ऋ. 10.90.12

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत
ऋ. 10.90.13

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन्
ऋ. 10.90.14

Page 47

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम्
ऋ. 10.90.15

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः
ऋ. 10.90.16

पूर्णात् पूर्णमुदचति पूर्णं पूर्णेन सिच्यते
उतो तदद्य विद्याम यतस्तत् परिषिच्यते
ऋ. 10.8.29

Page 49

आवहन्ती पोष्या वीर्याणि चित्रं केतुं कृणुते चेकिताना
ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यश्वैत्
ऋ. 1.113.15

द्यावो न स्तृभिश्चितयन्त खादिनो व्यभ्रिया न द्युतयन्त वृष्टयः
रुद्रो यद् वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र ऊधनि
ऋ. 2.34.2

उरौ महाँ अनिबाधे ववर्धाऽपो अग्निं यशसः सं हि पूर्वीः
ऋतस्य योनावशयद् दमूना जामीनामग्निरपसि स्वसृणाम्
ऋ. 3.1.11

अक्रो न बभ्रिः समिथे महीनां दिद्युक्षेयः सूनवे भाऋजीकः
उदुस्रिया जनिता यो जजानाऽपां गर्भो नृतमो यह्वो अग्निः
ऋ. 3.1.12

Page 50

को अद्धा वेद क इह प्र वोचद् देवाँ अच्छा पथ्या३ का समेति
दक्षं श्र एषामवमा सदांसि परेषु या गुह्येषु व्रतेषु
ऋ. 3.54.5

अधं जिह्वा पापतीति प्र वृष्णो गोषुयुधो नाशनिः सृजाना
शूरस्येव प्रसितिः क्षातिरग्नेर्दुर्वर्तुर्भीमो दयते बनानि
ऋ. 6.6.5

त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः
ऋ. 6.16.13

या ते द्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः
सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः
ऋ. 7.46.3

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 51

पुरुष एवेदꣳ सर्वं यद् भूतं यच्च भाव्यम्
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि

सा. 619

ता अंत्नत वयुनं वीरवंक्षणं समान्या वृतया विश्वमा रजः
अपो अपांचीरपरा अपेजते प्र पूर्वाभिस्तिरते देवयुर्जनः

ऋ. 5.48.2

वि या सृजति समनं व्यर्थिनः पदं न वेत्योदती
वयो नकिष्टे पप्तिवांस आसते व्युष्टौ वाजिनीवति

ऋ. 1.48.6

एषायुक्त परावतः सूर्यस्योदयनादधि
शतं रथेभिः सुभगोषा इयं वि यात्यभि मानुषान्

ऋ. 1.48.7

नि दुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि साधन्
वृतप्रतीक उर्विया व्यद्यौदग्निर्विश्वानि काव्यानि विद्वान्

ऋ. 3.1.18

Page 53

परि प्रासिष्यदत् कविः सिन्धोरूर्मावधि श्रितः
कारं बिभ्रत् पुरुस्पृहम्

सा. 446

Page 54

हिरण्यपाणिः सविता सुजिह्वस्त्विरा दिवो विदथे पत्यमानः
देवेषु च सवितः श्लोकमश्रेरादमभ्यमा सुव सर्वतातिम्

ऋ. 3.54.11

इमा जुहाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व
तव शर्मन् प्रियतमे दधाना उप स्थेयाम शरणं न वृक्षम्

ऋ. 7.95.5

उभे यत् तें महिना शुभ्रे अन्धसी अधिक्षियन्ति पूरवः
सा नो बोध्यवित्री मरुत्सखा चोद राधो मघोनाम्

ऋ. 7.96.2

Page 55

भद्रमिद् भद्रा कृणवत् सरस्वत्यकवारी चेतति वाजिनीवती
गृणाना जमदग्निवत् स्तुवाना च वसिष्ठवत्

ऋ. 7.96.3

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अमी य ऋक्षा निहितास उच्चा नक्तं दद्रृश्रे कुह चिद् दिवेयुः
अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति
ऋ. 1.24.10

इमं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा वरुणो जुषन्त
आदित्यासः शुचयो धारपूता अवृजिना अनवद्या अरिष्टाः
ऋ. 2.27.2

अश्विना हरिणाविव गौराविवानु यवसम्
हंसाविव पततमा-सुताँ उप
ऋ. 6.78.2

अकारि वागन्धसो वरीमन्नस्तारि बर्हिः सुप्रायणतमम्
उत्तान्नहस्तो युवयुर्वबन्दा ऽऽ वां नक्षन्तो अद्रय आजग्
ऋ. 6.63.3

Page 56

उदीर्ध्वं जीवो असुर्न आगादप प्रागात् तम आ ज्योतिरेति
आरैक् पन्थां यातवे सूर्यायागन्म यत्र प्रतिरन्त आयुः
ऋ. 1.113.6

Page 58

आदित्यासो अदितयः स्याम पूर्देवत्रा वसवो मर्त्यत्रा
सनेम मित्रावरुणा सनन्तो भवेम द्यावापृथिवी भवन्तः
ऋ. 7.52.1

ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदन्तः
सम्वत्सरस्य तदहः परिष्ठ यन्मण्डूकाः प्रावृषीणं बभूव
ऋ. 7.103.7

आपो यं वः प्रथमं देवयन्त इन्द्रपानमूर्मिमकृण्वतेळः
तं वो वयं शुचिमरिप्रमद्य घृतप्रुषं मधुमन्तं वनेम
ऋ. 7.47.1

Page 59

तमूर्मिमापो मधुमत्तमं वो ऽपां नपादवत्वाशुहेमा
यस्मिन्निन्द्रो वसुभिर्मादयाते तमश्यामदेवयन्तो वो अद्य
ऋ. 7. 47.2

ये अग्नयो न शोशुचन्निधाना द्विर्यत् त्रिर्मरुतो वावृधन्त।
अरेणवो हिरण्ययास एषां साकं नृम्णैः पौंस्येभिश्च भूवन्
ऋ. 6.66.2

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

यदेषां पृषती रथे प्रष्टिर्वहति रोहितः यान्ति शुभ्रा रिणन्नपः
ऋ. 8.7.28

यो अग्निध्मो दीदयदप्स्वन्तर्यं विप्रास ईळते अध्वरेषु
अपां नपान्मधुमतीरपो दा याभिरिन्द्रो वावृधे वीर्याय
ऋ. 10.30.4

ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमश्च सरः
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते
य. 23.48

Page 60

एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः
एकैवोषाः सर्वमिदं वि भात्येकं वा इदं वि बभूव सर्वम्
ऋ. 8.58.2

Page 62

माता देवानामदितेरनीकं यज्ञस्य केतुर्बृहती वि भाहि
प्रशस्तिकृद् ब्रह्मणे नो व्युच्छा नो जने जनय विश्ववारे
ऋ. 1.113.19

त आदित्यास उरवो गभीरा अदब्धासो दिप्सन्तो भूर्यक्षाः
अन्तः पश्यन्ति वृजिनोत साधु सर्वं राजभ्यः परमा चिदन्ति
ऋ. 2.27.3

तिस्रो भूमीर्धारयन् त्रीरुत द्यून् त्रीणि व्रता विदथे अन्तरेषाम्
ऋतमादित्या महि वो महित्वं तदर्यमन् वरुण मित्र चारु
ऋ. 2.27.8

Page 63

यस्यां अनन्तो अहुतस्त्वेषश्चरिष्णुरर्णवः। अमश्चरति रोरुवत्
ऋ. 6.61.8

आदित्यासो अदितिर्मादयन्तां मित्रो अर्यमा वरुणो रजिष्ठाः
अस्माकं सन्तु भुवनस्य गोपाः पिबन्तु सोममवसे नो अद्य
ऋ. 7.51.2

आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्वं ऋभवश्च विश्वे
इन्द्रो अग्निरश्विना यो अपां यो विश्वस्य जगतो देव ईशे
ऋ. 7.51.3

यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे
स त्रिधातु शरणं शर्म यंसत् त्रिवर्तु ज्योतिः स्वभिष्ट्यस्मे
ऋ. 7.101.2

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 64

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे
सा. 1839

Page 65

धारयन्त आदित्यासो जगत् स्था देवा विश्वस्य भुवनस्य गोपाः
दीर्घाधियो रक्षमाणा असुर्यमृतावानश्रयमाना ऋणानि
ऋ. 2.27.4

स होता विश्वं परि भूत्वध्वरं तमु ह्वयैर्मनुष ऋञ्जते गिरा
हिरिशिप्रो वृधसानासु जर्भुरद् द्यौर्न स्तृभिश्चितयद् रोदसी अनु
ऋ. 2.2.5

यो वामृजवे क्रमणाय रोदसी मर्तो ददाश धिषणे स साधति
प्र प्रजाभिर्जायते धर्मणस्परि युवोः सिक्ता विषुरूपाणि सव्रता
ऋ. 6.70.3

स्तरीरु त्वद् भवति सूत उ त्वद् यथावशं तन्वं चक्र एषः
पितुः पयः प्रति गृभ्णाति माता तेन पिता वर्धते तेन पुत्रः
ऋ. 7.101.3

Page 68

अहं मनुरभवं सूर्यश्चाऽहं कक्षीवाँ ऋषिरस्मि विप्रः
अहं कुत्समार्जुनेयं न्यृञ्जे ऽहं कविरुशना पश्यता मा
ऋ. 4.26.1

अहं भूमिमददामार्यायाऽहं वृष्टिं दाशुषे मर्त्याय।
अहमपो अनयं वावशाना मम देवासो अनु केतमायन्
ऋ. 4.26.2

Page 69

अहं पुरो मन्दसानो व्यैरं नव साकं नवतीः शम्बरस्य
शततमं वेश्यं सर्वताता दिवोदासमतिथिग्वं यदावम्
ऋ. 4.26.3

अहं राजा वरुणो मह्यं तान्यसुर्याणि प्रथमा धारयन्त
क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः
ऋ. 4.42.2

ममाणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम्
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु
सा. 1870

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि महा
ऋतस्य मा प्रदिशो वर्धयन्त्यादर्दिरो भुवना दर्दरीमि

ऋ. 8.100.4

Page 70

इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम्
शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन

ऋ. 10.18.4

अहं स यो नवंवास्त्वं बृहद्रथं सं वृत्रेव दासं वृत्रहारुजम्
यद्वर्धयन्तं प्रथयन्तमानुषग्दूरे पारे रजसो रोचनाकरम्

ऋ. 10.49.6

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा

ऋ. 10.125.1

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्

ऋ. 10.125.3

मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम्
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि

ऋ. 10.125.4

Page 71

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः
यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्

ऋ. 10.125.5

अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्तवा उ
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश

ऋ. 10.125.6

अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा
परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव

ऋ. 10.125.8

मूर्धाहं रयीणां मूर्धा समानानां भूयासम्

अ. 16.3.1

तपनो अस्मि पिशाचानां व्याघ्रो गोमतामिव
श्वानः सिंहमिव दृष्ट्वा ते न विन्दन्ते न्यञ्चनम्

अ. 4.36.6

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 72

अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम्
अहं दधामि द्रविणं हविष्मते सुप्राव्ये३ यजमानाय सुन्वते
ऋ. 10.125.2

Page 74

सत्यमहं गभीरः काव्येन सत्यं जातेनास्मि जातवेदाः
न मे दासो नार्यो महित्वा व्रत मीमाय यदहं धरिष्ये
अ. 5.11.3

अध्यक्षो वाजी मम कामं उग्रः कृणोतु मह्यमसपत्नमेव
विश्वे देवा मम नाथं भवन्तु सर्वे देवा हवमा यन्तु म इमम्
अ. 9.2.7

अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम्
सजूर्देवेभिरवरैः परैश्चान्तर्यामे मघवन् मादयस्व
य. 7.5

चक्रिर्यो विश्वा भुवनाभि सासहिश्चक्रिर्देवेष्वा दुवः
आ देवेषु यतत आ सुवीर्य आ शंस उत नृणाम्
ऋ. 3.16.4

Page 75

नमोऽस्तु ते निर्ऋते तिग्मतेजोऽयस्मयान् वि चृता बन्धपाशान्
यमो मह्यं पुनरित् त्वां ददाति तस्मै यमाय नमो अस्तु मृत्यवे
अ. 6.63.2

यस्य वातः प्राणापानौ चक्षुरङ्गिरसोऽभवन्
दिशो यश्चक्रे प्रज्ञानीस्तस्मै ज्येष्ठाय ब्रह्मणे नमः
अ. 10.7.34

नम इदुग्रं नम आ विवासे नमो दाधार पृथिवीमुत द्याम्
नमो देवेभ्यो नम ईश एषां कृतं चिदेनो नमसा विवासे
ऋ. 6.51.8

मीढुष्टम शिवतम शिवो नः सुमना भव
परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर पिनाकं बिभ्रदा गहि
य. 16.51

Page 76

नमस्ते रुद्र मन्यव उतो त इषवे नमः। बाहुभ्यामुत ते नमः
य. 16.1

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

नमो॑ म॒हद्भ्यो नमो॑ अर्भ॒केभ्यो॒ नमो॒ युव॑भ्यो॒ नम॑ आशि॒नेभ्य॑ः

ऋ. 1.27.13

ऋ॒चो अ॒क्षरे॑ पर॒मे व्यो॑मन् यस्मि॑न् दे॒वा अधि॒ विश्वे॑ निषे॒दुः
यस्तन्न वेद॒ किमृ॒चा क॑रिष्यति॒ य इत् तद् वि॒दुस्ते अ॒मी सम॑ासते

अ. 9.10.18

Page 77

की॒र्तिश्च॒ यश॒श्चाम्भ॑श्च॒ नभ॑श्च ब्राह्मणवर्च॒सं चान्नं॑ चा॒न्नाद्य॑ च
य ए॒तं दे॒वमे॑क॒वृतं॒ वेद॑
न द्वि॒तीयो॒ न तृ॒तीय॑श्चतुर्थो नाप्यु॑च्यते। य ए॒तं दे॒वमे॑क॒वृतं॒ वेद॑
न प॑ञ्च॒मो न ष॒ष्ठः स॑प्त॒मो नाप्यु॑च्यते। य ए॒तं दे॒वमे॑क॒वृतं॒ वेद॑
नाष्ट॒मो न न॑व॒मो द॑श॒मो नाप्यु॑च्यते। य ए॒तं देवमे॑क॒वृतं वेद॑
स सर्व॑स्मै॒ वि प॑श्यांते॒ यच्च॑ प्रा॒णति॒ यच्च॒ न। य ए॒तं दे॒वमे॑क॒वृतं॒ वेद॑
तमि॒दं निग॑तं॒ सहः॒ स ए॒ष एक॑ एक॒वृदेक॑ ए॒व। य ए॒तं दे॒वमे॑क॒वृतं॒ वेद॑
सर्वे॑ अस्मिन् दे॒वा ए॑कवृतो॑ भवन्ति। य ए॒तं दे॒वमे॑क॒वृतं॒ वेद॑

अ. 23.5.14-21

Page 78

तदे॒वाग्निस्तदा॑दित्यस्तद्वा॒युस्तदु॑ च॒न्द्रमा॑ः
तदे॒व शु॒क्रं तद्ब्रह्म॒ ता आप॒ः स प्र॒जाप॑तिः

य. 32.1

एक॑ ए॒वाग्निर्ब॑हुधा समिद्ध॑ एक॒ः सूर्यो॒ विश्व॒मनु॒ प्रभू॑तः
एकै॒वोषाः सर्व॑मि॒दं वि भा॒त्येकं॒ वा इ॒दं वि ब॑भूव॒ सर्व॑म्

ऋ. 8.58.2

इन्द्र॑ मि॒त्रं वरु॑णम॒ग्निमा॑हुरथो॑ दि॒व्यः स सु॑प॒र्णो ग॒रुत्मा॑न्
एकं॒ सद् विप्रा॑ बहु॒धा व॑दन्त्य॒ग्निं य॒मं मा॑त॒रिश्वा॑नमाहुः

ऋ. 1.64.46

वि॒द्मा शरस्य॑ पि॒तर॑ च॒न्द्रं शतवृ॑ष्ण्यम्
तेना॑ ते त॒न्वे॒ 3 शंकरं पृ॒थिव्यां ते नि॒षेचनम् ब॒हिष्टे अस्तु॒ बालिति॑

अ. 1.3.4

Page 79

तमि॒दं निग॑तं॒ सहः॒ स ए॒ष एक॑ एक॒वृदेक॑ ए॒व। य ए॒तं दे॒वमे॑क॒वृतं॒ वेद॑

अ. 13.5.20

सर्वे॑ अस्मिन् दे॒वा ए॑क॒वृतो॑ भवन्ति। य ए॒तं दे॒वमे॑क॒वृतं॒ वेद॑

अ. 13.4.21

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः
सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः
ऋ. 10.120.1

तमूतयो रणयञ्छूरसातौ तं क्षेमस्य क्षितयः कृण्वत त्राम्
स विश्वस्य करुणस्येश एको मरुत्वान् नो भवत्विन्द्र ऊती
ऋ. 1.100.7

अयमेक इत्था पुरूरु चष्टे वि विशपतिः। तस्य व्रतान्यनु वश्चरामसि
ऋ. 8.25.16

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः
हिरण्यगर्भ इत्येष मा मा हिंसीदित्येषा यस्मान्न जात इत्येषः
य. 32.3

समेत विश्वा ओजसा पतिं दिवो य एक इद्धूरतिथिर्जनानाम्
स पूर्व्यो नूतनमाजिगीषं तं वर्तनीरनु वावृत एक इत्
सा. 372

Page 80

इमं नो देव सवितर्यज्ञं प्र णय
य. 10.8

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते
य. 31.10

स इत् तन्तुं स वि जानात्योतुं स वक्त्वान्यूतुथा वदाति
य ईं चिकेतदमृतस्य गोपा अवश्चरन् परो अन्येन पश्यन्
ऋ. 6.9.3

Page 82

विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत सन्दृक्
तेषामिष्टानि समिषा मदन्ति यत्रा सप्त ऋषीन् पर एकमाहुः
य. 17.26

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदा। समूढमस्य पांसुरे
अ. 7.26.4

त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्
सा. 1670

Page 83

तं पृच्छता स जगामा स वेद स चिकित्वाँ ईयते सा न्वीयते
तस्मिन् त्सन्ति प्रशिषस्तस्मिन्निष्टयः स वाजस्य शवसः शुष्मिणस्पतिः
ऋ. 1.145.1

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

हंसः शुचिषद् वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्
नृषद् वरसदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम्

ऋ. 4.40.5

रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश

ऋ. 6.47.18

Page 85

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्

य. 31.18

Page 86

यो विश्वचर्षणिरुत विश्वतोमुखो यो विश्वतस्पाणिरुत विश्वतस्पृथः
सं बाहुभ्यां भरति सं पतत्रैर्द्यावापृथिवी जनयन् देव एकः

अ. 13.2.26

य एकश्चर्षणीनां वसूनामिरज्यति। इन्द्रः पञ्च क्षितीनाम्

अ. 20.70.15

अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः
नीचीनाः स्थुरुपरि बुध्न एषामस्मे अन्तर्निहिताः केतवः स्युः

ऋ. 1.24.7

न यं दिप्सन्ति दिप्सवो न द्रुहाणो जनानाम्। न देवमभिमातयः

ऋ. 1.25.15

अश्व्यो वारो अभवस्तदिन्द्र सृके यत् त्वा प्रत्यहन् देव एकः
अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त सिन्धून्

ऋ. 1.32.12

Page 87

यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा
नू चित् स दभ्यते जनः

ऋ. 1.41.1

यं बाहुतेव पिप्रति पान्ति मर्त्यं रिषः। अरिष्टः सर्व एधते

ऋ. 1.41.2

स रत्नं मर्त्यो वसु विश्वं तोकमुत त्मना। अच्छा गच्छत्यस्तृतः

ऋ. 1.41.6

श्वसित्यप्सु, हंसो न सीदन् क्रत्वा चेतिष्ठो, विशामुषर्भुत्
सोमो वेधा ऋतप्रजातः पशुर्न शिश्वा विभुर्दूरभाः

ऋ. 1.65.5

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

क्षेमो न साधुः क्रतुर्न भद्रो भुवत् स्वाधी र्होता हव्यवाट्
ऋ. 1.67.2

येनेमा विश्वा व्यवना कृतानि यो दासं वर्णमधरं गुहाकः
श्वघ्नीव यो जिगीवाँ लक्षमाददर्यः पुष्टानि सं जनास इन्द्रः
ऋ. 2.12.4

Page 88

यो भूतं च भव्यं च सर्वं यश्चाधितिष्ठति
स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः
अ. 10.8.1

Page 90

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि। तवेत् तत् सत्यमङ्गिरः
ऋ. 1.1.6

युवामिद्धयवसे पूर्व्याय परि प्रभूती गविषः स्वापी
वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शंभू
ऋ. 4.41.7

महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमस्य यत् स्वम्
अजामिमन्यः श्नथयन्तमातिरद् दभ्रेभिरन्यः प्र वृणोति भूयसः
ऋ. 7.82.6,

Page 91

अग्निं मन्द्रं पुरुप्रियं शीरं पावकशोचिषम्। हृद्भिर्मन्द्रेभिरीमहे
ऋ. 8.43.31

यदग्ने स्यामहं त्वं त्वं वा धा स्या अहम् स्युष्टे सत्या द्रहाशिषः
ऋ. 8.44.23

अन्ति सन्तं न जहात्यन्ति सन्तं न पश्यति
देवस्य पश्य काव्यं न ममार न जीर्यति
अ. 10.8.32

त्राता नो बोधि दद्दशान आपिरभिख्याता मर्डिता सोम्यानाम्
सखा पिता पितृतमः पितृणां कर्तेमु लोकमुशते वयोधाः
ऋ. 4.17.17

Page 92

इन्द्रं यस्ते नवीयसीं गिरं मन्द्रामजीजनत
चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम्
ऋ. 8.95.5

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

यदस्य धामनि प्रिये समीचीनासो अस्वरन्
नाभा यज्ञस्य दोहना प्राध्वरे

ऋ. 8.12.32

दोहेन गामुप शिक्षा सखायं प्र बोधय जरितर्जारमिन्द्रम्
कोशं न पूर्णं वसुना न्यृष्टमा च्यावय मघदेयाय शूरम्

ऋ. 10.42.2

अग्ने नक्षत्रमजरमा सूर्यं रोहयो दिवि। दधज्ज्योतिर्जनेभ्यः

ऋ. 10.156.4

क्रत्वः समह दीनता प्रतीपं जगमा शुचे। मृळा सुक्षत्र मृळय
अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारम्। मृळा सुक्षत्र मृळय

ऋ. 7.894

Page 94

अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि। स इद् देवेषु गच्छति

ऋ. 1.1.4

इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा। इन्द्रो वज्री हिरण्ययः

ऋ. 1.7.2

महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे। द्यौर्न प्रथिना शवः

ऋ. 1.8.5

यः कुक्षिः सोमपातमः समुद्र इव पिन्वते। उर्वीरापो न काकुदः

ऋ. 1.8.7..

Page 95

त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि। स यामनि प्रति श्रुधि

ऋ. 1.25.20

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः। स यन्ता शश्वतीरिषः

ऋ. 1.27.7

त्वमग्ने वृजिनवर्तनिं नरं सक्मन् पिपर्षि विदथे विचर्षणे
यः शूरसाता परितकम्ये धने दभ्रेभिश्चित् समृता हंसि भूयसः

ऋ. 1.31.6

त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवेदिवे
यस्तातृषाण उभयाय जन्मने मयः कृणोषि प्रय आ च सूरये

ऋ. 1.31.7

Page 97

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः

ऋ. 1.6.3

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

त्वमग्ने प्रमतिस्त्वं पितासि नस् त्वं वयस्कृत् तव जामयो वयम्
सं त्वा रायः शतिनः सं सहस्रिणः सुवीर यन्ति व्रतपामदाभ्य
ऋ. 1.31.10

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम्
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम्
ऋ. 2.23.1

आ ते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः
अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः
ऋ. 2.33.4

सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत्
ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत् ते महित्वनम्
ऋ. 2.23.4

त्वया हितमप्यमप्सु भागं धन्वान्वा मृगयसो वि तस्थुः
वनानि विभ्यो नकिरस्य तानि व्रता देवस्य सवितुर्मिनन्ति
ऋ. 2.38.7

ऋतं वोचे नमसा पृच्छ्यमानस्तवाशसा जातवेदो यदीदम्
त्वमस्य क्षयसि यद्ध विश्वं दिवि यदु द्रविणं यत् पृथिव्याम्
ऋ. 4.5.11

देवेभ्यो हि प्रथमं यज्ञियेभ्यो ऽमृतत्वं सुवसि भासगमुत्तमम्
आदिद् दामानं सवितर्व्यूर्णुषे ऽनूचीना जीविता मानुषेभ्यः
ऋ. 4.54.2

न प्रमिये सवितुर्दैव्यस्य तद् यथा विश्वं भुवनं धारयिष्यति
यत् पृथिव्या वरिमन्ना स्वङ्गुरिर्वर्ष्मन् दिवः सुवति सत्यमस्य तत्
ऋ. 4.54.4

सहस्राक्षं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम्
स देवान्त्सर्वानुरस्युपदद्य संपश्यन् याति भुवनानि विश्वा
अ. 10.8.18

इन्द्रज्येष्ठान् बृहद्भ्यः पर्वतेभ्यः क्षयाँ एभ्यः सुवसि प्रस्त्यावतः
यथावथा पतयन्तो वियेमिर एवैव तस्थुः सवितः सवाय ते
ऋ. 4.54.5

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

त्वमग्ने यज्ञानां होता विश्वेषां हितः। देवेभिर्मानुषे जने

ऋ. 6.16.1

इयमददाद् रभसमृणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे
या शश्वन्तमाचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति

विश्वे देवा अनमस्यन् भियानास्त्वामग्ने तमसि तस्थिवांसम्
वैश्वानरोऽवतूतये नो ऽमर्त्योऽवतूतये नः

ऋ. 6.9.7

वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा। अग्ने यज्ञेषु सुक्रतो

ऋ. 6.16.3

यत्र क्व च ते मनो दक्षं दधस उत्तरम्। तत्रा सदः कृणवसे

ऋ. 6.16.17

Page 103

अवं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु
शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः

ऋ. 7.86.8

त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः

ऋ. 8.11.1

पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्रभुः। समत्सु त्वा हवामहे

ऋ. 8.11.8

अवं वा मधुमत्तमः सुतः सोम ऋतावृधा।
तमश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे

सा. 306

दूराच्चकमानायं प्रतिपाणायाक्षये
आस्मा अशृण्वन्नाशाः कामेनाजनयन्त्स्वः

अ. 19.52.3

रास्वेयत्सोमा भूयो भर देवो नः सविता वसोर्दाता वस्वदात्

य. 4.16

Page 105

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम्

ऋ. 1.89.10

Page 106

उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि

ऋ. 1.1.7

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

यत् सानोः सानुमारुहद् भूर्यस्पष्ट कर्त्वम्
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति
ऋ. 1.10.2

इन्द्रं विश्वा अवीवृधन्त् समुद्रव्यचसं गिरः
रथीतमं रथीनां वाजानां सत्पतिं पतिम्
ऋ. 1.11.1

आ नो गहि सख्येभिः शिवेभिर्महान् महीभिरूतिभिः सरण्यन्
अस्मे रयिं बहुलं संतरुत्रं सुवाचं भागं यशसं कृधी नः
ऋ.3.1.19

Page 107

अच्छा नो याह्या वहाऽभि प्रयांसि वीतये
आ देवान् त्सोमपीतये
ऋ. 6.16.44

विश्वे देवास आ गत शृणुता म इमं हवम्। एदं बर्हिर्निषीदत
ऋ. 6.52.7

सम्यक् स्रवन्ति सरितो न धेनो अन्तर्हृदा मनसा श्यमानाः
एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः
ऋ. 4.58.6

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हवामहे
अ. 3.16.1

ऐन्द्रः प्राणो अङ्गे अङ्गे नि दीध्यदैन्द्र उदानो अङ्गे अङ्गे निधीतः
देव त्वष्टर्भूरि ते सथ्स समेतु सलक्ष्मा यद्विषुरूपं भवाति
देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरौ मदन्तु
य. 6.2

दृते दृथ्हं मा। ज्योक्ते सन्दृशि जीव्यासं ज्योक्ते सन्दृशि जीव्यासम्
य. 36.19

Page 108

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम
ऋ. 10.121.2

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम
ऋ. 10.121.3

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम

ऋ. 10.121.4

Page 109

मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा सत्यधर्मा जजान
यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम

ऋ. 10.121.9

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव
यत् कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्

ऋ. 10.121.10

यस्य द्यौरुर्वी पृथिवी च मही यस्याद उर्वन्तरिक्षम्
यस्यासौ सूरो विततो महित्वा कस्मै देवाय हविषा विधेम

अ. 4.2.4

Page 110

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु

य. 34.1

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु

य. 34.2

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु
यस्मान्न ऋते किं चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु

य. 34.3

Page 111

येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम्।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु

य. 34.4

यस्मिन्नृचः साम यजूंष्यृषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः
यस्मिंश्चित्तथ्ं सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु

य. 34.5

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु

य. 34.6

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 113

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः
वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ
शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि

य. 36.17

Page 114

विश्वे देवासो अस्रिध एहिमायासो अद्रुहः। मेधं जुषन्त वह्नयः

ऋ. 1.3.9

एवा ह्यस्य सूनृता विरप्शी गोमती मही। पक्वा शाखा न दाशुषे

ऋ. 1.8.8

उषे भद्रे जोषयेते न मेने गावो न वाश्रा उप तस्थुरेवैः
स दक्षाणां दक्षपतिर्बभूवाञ्जन्ति यं दक्षिणतो हविर्भिः

ऋ. 1.95.6

न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा
पाक्या चिद् वसवो धीर्या चिद् युष्मानीतो अभयं ज्योतिरश्याम्

ऋ. 2.27.11

कथा सबाधः शशमानो अस्य नशदभि द्रविणं दीध्यानः
देवो भुवन्नवेदा म ऋतानां नमो जगृभ्वाँ अभि यज्जुजोषत्

ऋ. 4.23.4

पुष्यात् क्षेमे अभि योगे भवात्युभे वृतौ संयती सं जयाति
प्रियः सूर्ये प्रियो अग्ना भवाति य इन्द्राय सुतसोमो ददाशत्

ऋ. 5.37.5

Page 115

यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति
यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः

ऋ. 5.44.14

त्वां हि ष्मा चर्षणयो यज्ञेभिर्गीर्भिरीळते
त्वां वाजी यात्ववृको रजस्तूर्विश्वचर्षणिः

ऋ. 6.2.2

सहस्रेणेव सचते यवीयुधा यस्त आनळुपस्तुतिम्
पुत्रं प्रावर्गं कृणुते सुवीर्यं दाश्नोति नमउक्तिभिः

ऋ. 8.4.6

विशंविशं मघवा पर्यशायत जनानां धेना अवचाकशद्वृषा
यस्याहं शक्रः सवनेषु रण्यति स तीव्रैः सोमैः सहते पृतन्यतः

अ. 20.17.6

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

विशंविशं मघवा पर्यशायत जनानां धेना अवचाकशद्वृषा
यस्याहं शक्रः सवनेषु रण्यति स तीव्रैः सोमैः सहते पृतन्यतः
ऋ. 10.43.6

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते
सा. 300

Page 117

यथा सूर्यो अतिभाति यथास्मिन् तेज आहितम्
एवा मे वरुणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा
अ. 10.3.17

श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो
पर्षिणः पारमंहसः स्वस्ति विश्वा अभीतो रपसो युयोधि
ऋ. 2.33.3

सुकृत सुपाणिः स्ववाँ ऋतावा देवस्त्वष्टावसे तानि नो धात्
पूषणवन्तः ऋभवो मादयध्व मूर्ध्वग्रावाणो अध्वरमतष्ट
ऋ. 3.54.12

यो मृळयाति चक्रुषे चिदागो वयं स्याम वरुणे अनागाः
अनु व्रतान्यदितेरृधन्तो यूयं पात स्वस्तिभिः सदा नः
ऋ. 7.87.7

Page 118

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु
ऋ. 1.89.6

ब्रह्मणस्पते सुयमस्य विश्वहा रायः स्याम रथ्योऽ वयस्वतः
वीरेषु वीराँ उप पृङ्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवम्
ऋ. 2.24.15

स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति
स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि
ऋ. 5.51.14

सुवीरं रयिमा भर जातवेदो विचर्षणे। जहि रक्षांसि सुक्रतो
ऋ. 6.16.29

भरद्वाजाय सप्रथः शर्म यच्छ सहन्त्य। अग्ने वरेण्यं वसु
ऋ. 6.16.33

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तवं त्रिधातु पृथिवी उत द्यौर्वैश्वानर व्रतमग्ने सचन्त
त्वं भासा रोदसी आ ततन्थाऽजस्रेण शोचिषा शोशुचानः
ऋ. 7.5.4

Page 119

शं नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः शमु सन्तु रायः
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु
ऋ. 7.35.2

शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः
शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु
ऋ. 7.35.3

शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शम्
शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः
ऋ. 7.35.4

शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः
ऋ. 7.35.5

Page 121

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः
ऋ. 2.1.1

Page 122

शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः
ऋ. 7.35.8

शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः
शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः
ऋ. 7.35.9

शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः
ऋ. 7. 35.10

शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः
ऋ. 7.35.11

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 123

शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु

ऋ. 7.35.12

शं नो अज एकपाद् देवो अस्तु शं नोऽहिर्बुध्न्यः शं समुद्रः
शं नो अपां नपात् पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा

ऋ. 7.35.13

याम्मेधान्देवगणाः पितरश्चोपासते
तयामामद्यमेधयाग्नेमेधाविनङ्करु स्वाहा

य. 32.14

शान्ता द्यौः शान्ता पृथिवी शान्तमिदमुर्वन्तरिक्षम्
शान्ता उदन्वतीरापः शान्ता नः सन्त्वोषधीः

अ. 19.9.1

Page 124

सं सीदस्व महाँ असि शोचस्व देववीतमः
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम्

ऋ. 1.36.9

एवा ते हारियोजना सुवृक्तीन्द्र ब्रह्माणि गोतमासो अक्रन्
ऐषु विश्वपेशसं धियं धाः प्रातर्मक्षू धियावसुर्जगम्यात्

ऋ 1.61.16

अनागसो अदितये देवस्य सवितुः सवे। विश्वा वामानि धीमहि

ऋ. 5. 82.6

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः
मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः। मधु द्यौरस्तु नः पिता
मधुमान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः

य. 13.27-29

Page 125

दा नो अग्ने धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तम्
न यं वावा तरति यातुमावान्

ऋ. 7.1.5

अरं दासो न मीळहुषे कराण्यहं देवाय भूर्णयेऽनागाः
अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति

ऋ. 7.85.7

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

न देवानामति व्रतं शतात्मा चन जीवति। तथा युजा वि वावृते
ऋ. 10.33.9

भद्रं नो अपि वातय मनः
ऋ. 1.21.1

अस्मे धेहि द्युमतीं वाचमासन बृहस्पते अनमीवामिषिराम
यया वृष्टिं शंतनवे वनाव दिवो द्रप्सो मधुमाँ आ विवेश
ऋ. 10.98.3

Page 127

यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह
अग्निर्भा तत्र नयत्वग्निर्मेधा दधातु मे। अग्नये स्वाहा
अ. 19.43.1

यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह
वायुर्मा तत्र नयतु वायुः प्राणान् दधातु मे। वायवे स्वाहा
अ. 19.43.2

यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह
सूर्यो मा तत्र नयतु चक्षुः सूर्यो दधातु मे। सूर्याय स्वाहा
य. 19.43.3

पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदा भराग्निं पुरीष्यमङ्गिरस्वदच्छेमोऽग्निं पुरीष्यमङ्गिरस्वद्धरिष्यामः
य. 11.16

मा नो अग्नेऽमतये मावीरतायै रीरधः
मागोतायै सहसस्पुत्र मा निदे ऽप द्वेषांस्या कृधि
ऋ. 3.16.5

Page 129

यतोयतः समीहसे तो नो अभयं कुरु
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः
य. 36.22

देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो नि वर्तताम्
देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे
ऋ. 1.89.2

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः
ऋ. 1.89.8

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 130

या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु
तेभिर्नो विश्वैः सुमना अहेळन् राजन्त्सोम प्रतिहव्या गृभाय

ऋ. 1.91.4

भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम
तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह

ऋ. 7.41.5

ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः
ते सौभगं वीरवद्गोमदप्नो दधातन द्रविणं चित्रमस्मे

ऋ. 10.36.13

तुञ्जेतुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः न विन्धे अस्य सुष्टुतिम्

ऋ. 1.7.7

Page 131

तेजोऽसि तेजो मयि धेहि[1] वीर्यमसि वीर्यं मयि धेहि[2]
बलमसि बलं मयि धेह्यो[3]–
ओजस्योजो मयि धेहि[4] मन्युरसि मन्युं मयि धेहि[5]
सहोऽसि सहो मयि धेहि[6]

य. 19.9

अश्विना पुरुदंससा नरा शवीरया धिया धिष्ण्या वनतं गिरः

ऋ. 1.3.2

ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे

ऋ. 1.36.13

पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः
पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य

ऋ. 1.36.15

मा नो अग्नेऽव सृजो अघायाऽविष्यवे रिपवे दुच्छुनायै
मा दत्वते दशते मादते नो मा रीषते सहसावन् परा दाः

ऋ 1.189.5

विश्वा उत त्वया वयं धारा उदन्या इव
अति गाहेमहि द्विषः

ऋ. 2.7.3

Page 133

तस्य व्रात्यस्य। एकं तदेषाममृतत्वमित्याहुतिरेव

अ. 15.17.10

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

आ नो बृहन्ता बृहतीभिरूती इन्द्र यातं वरुण वाजसातौ
यद् दिद्यवः पृतनासु प्रक्रीळान् तस्य वां स्याम सनितार आजेः
ऋ. 4.41.11

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री
ऋ. 6.15.12

त्वं नः पाह्यंहसो जातवेदो अघायतः रक्षा णो ब्रह्मणस्कवे
ऋ. 6.16.30

यो नो अग्ने दुरेव आ मर्तो वधाय दाशति। तस्मान्नः पाह्यंहसः
ऋ. 6.16.31

मा नो वृकाय वृक्ये समस्मा अघायते रीरधता यजत्राः
यूयं हि ष्ठा रथ्यो नस्तनूनां यूयं दक्षस्य वचसो बभूव
ऋ. 6.51.6

३ २१ ३२३१२ ३ २ ३२३२ १३२ २१३ २
त्रातारमिन्द्रमवितारमिन्द्रँ हवेहवे सुहवँ शूरमिन्द्रम्
३२उ ३१ २ ३१ २र३२ ३ २ ३ १ ३ १ २
हुवे नु शक्रं पुरुहूतमिन्द्रमिदँ हविर्मघवा वेत्विन्द्रः
सा. 333

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमांसं परि पातु विश्वतः
ऋ. 6.75.14

यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम्
ऋ. 6.75.19

ध्रुवासु त्वासु क्षितिषु क्षियन्तो व्यꣳस्मत् पाशं वरुणो मुमोचत्
अवो वन्वाना अदितेरुपस्थाद यूयं पात स्वस्तिभिः सदा नः
ऋ. 7.88.7

अव द्रुग्धानि पित्र्या सृजा नो ऽव या वयं चकृमा तनूभिः
अव राजन् पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम्
ऋ. 7.86.5

प्रास्मत् पाशान् वरुण मुञ्च सर्वान् य उत्तमा अधमा वारुणा ये
दुष्वप्न्यं दुरितं नि ष्वास्मदथ गच्छेम सुकृतस्य लोकम्
अ. 7.83.4

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

उरुं नो लोकमनु नेपि विद्वान्त्स्वं१ र्यज्ज्योतिरभयं स्वस्ति
उग्रा त इन्द्र स्थविरस्य बाहू उपं क्षयेम शरणा बृहन्ता

अ. 19.15.4

यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वा दधे[13]। अनु त्वा देववी[14]तये

य. 5.9

युयोध्यस्मद् द्वेषाꣳसि विश्वकर्मणे स्वाहा[3]

य. 12.43

मीढुष्टम शिवतम शिवो नः सुमना भव
परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर पिनाकं बिभ्रदा गहि[3]

य. 16.51

Page 139

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः

ऋ. 1.89.9

अग्ने त्वमस्मद् युयोध्यमीवा अनग्नित्रा अभ्यमन्त कृष्टीः
पुनरस्मभ्यꣳ सुविताय देव क्षां विश्वेभिरमृतेभिर्यजत्र

ऋ. 1.189.3

समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ् विश्वानि भुवनान्यस्थात्
होता पावकः प्रदिवः सुमेधा देवो देवान् यजत्वग्निरर्हन्

ऋ. 2.33.1

सविता पश्चातात् सविता पुरस्तात् सवितोत्तरात्तात् सविताधरात्तात्
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः

ऋ. 10.36.14

ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः
वाचस्पतिर्बला तेषां तन्वोऽ अद्य दधातु मे

अ. 1.1.1

अघशंसदुःशंसाभ्यां करेणानुकरेण च
यक्ष्मं च सर्वं तेनेतो मृत्युं च निरजामसि

अ. 12.2.2

Page 140

वाङ् म आसन् नसोः प्राणश्चक्षुरक्ष्णोः श्रोत्रं कर्णयोः
अपलिताः केशा अशोणा दन्ता बहु बाह्वोर्बलम्

अ. 19.60.1

ऊर्वोरोजो जङ्घयोर्जवः पादयोः। प्रतिष्ठा अरिष्टानि मे सर्वात्मानिभृष्टः

अ. 19.60.2

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अग्ने यन्मे तन्वा ऊनं तन्म आपृण

य. 3.17

अहं तवं वीरं विदेय तवं देवि सन्दृशि

य. 4.23

नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्या इयं ते राड्
अस्मे वो अस्त्विन्द्रियमस्मे नृम्णुत क्रतुरस्मे वर्चाꣳसि सन्तु वः

य. 9.22

प्र ब्रवाम शरदः शतमदीनाः स्याम शरदः शतं

य. 36.24

Page 142

देवकृतस्यैनसोऽवयजनमसि

य. 8.13

मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो
सकृत् सु नो मघवन्निन्द्र मृळयाऽधा पितेव नो भव

ऋ. 10.33.3

यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु
शं नो भवतु भुवनस्य यस्पतिः'

य. 36.2

मा नो रक्ष अभि नड्यातुमावतामपोच्छतु मिथुना या किमीदिना
पृथिवी नः पार्थिवात् पात्वꣳहसो ऽन्तरिक्षं दिव्यात् पात्वस्मान्

ऋ. 7.104.23

द्विषो नो विश्वतोमुखातिं नावेव पारय। अप नः शोशुचदघम्

अ. 1.33.7

Page 143

यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतम्। मिनीमसि द्यविद्यवि

ऋ. 1.25.1

इमं नु सोममन्तितो हृत्सु पीतमुप ब्रुवे
यत् सीमागꣳश्चकृमा तत् सु मृळतु पुलुकामो हि मर्त्यः

ऋ. 1.179.5

अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता
देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः

ऋ. 4.54.3

मा नो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य
आ नो भज बर्हिषि जीवशꣳसु यूयं पात स्वस्तिभिः सदा नः

ऋ. 7.46.4

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

किमाग आस वरुण ज्येष्ठं यत् स्तोतारं जिघांससि सखायाम्
प्र तन्मे वोचो दूळभ स्वधावा ऽवं त्वानेना नमसा तुर इयाम्
ऋ. 7. 86.4

Page 145

न स स्वो दक्षो वरुण धृतिः सा सुरा मन्युर्विभीदको अचितिः
अस्ति ज्यायान् कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता
ऋ. 7.86.6

मो षु वरुण मृन्मयं गृहं राजन्नहं गमम्। मृळा सुक्षत्र मृळयं
ऋ. 7.89.1

यदेमि प्रस्फुरन्निव दृतिर्न ध्मातो अद्रिवः। मृळा सुक्षत्र मृळयं
ऋ. 7.89.2

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। योऽसावादित्ये पुरुषः सोऽसावहम् ओ३म् खं ब्रह्म
य. 40.17

Page 146

यामिषुं गिरिश्नन्त हस्ते बिभर्ष्यस्तवे
शिवाङ्गिरित्राताङ्कुरुमाहिंसी पुरुषञ्जगत्
य. 16.3

मायाभिरिन्द्र मायिनं त्वं शुष्णमवतारिः।
विदुष्टे तस्य मेधिरास तेषां श्रवांस्युत्तिर
ऋ. 1.11.7

यो नो अग्नेऽभिदासत्यन्ति दूरे पदीष्ट सः। अस्माकमिद् वृधे भव
ऋ. 1.79.11

जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः
ऋ. 1.99.1

Page 147

यो न आगो अभ्येनो भरात्यधीदघमघशंसे दधात
जही चिकित्वो अभिशस्तिमेतामग्ने यो नो मर्चयति द्वयेन
ऋ. 5.3.7

विसर्माणं कृणुहि वित्तमेषां ये भुञ्जते अपृणन्तो न उक्थैः
अपव्रतान् प्रसवे वावृधानान् ब्रह्मद्विषः सूयादं यावयस्व
ऋ. 5.42.10

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

आ भानुना पार्थिवानि जयांसि महस्तोदस्य धृषता ततन्थ
स बाधस्वापभया सहोभिः स्पृधो वनुष्यन् वनुषो नि जूर्व
ऋ. 6.6.6

अग्निस्तिग्मेन शोचिषा यासद विश्वं न्यत्त्रिणम्
अग्निर्नो वनते रयिम्
ऋ. 6.16.28

मा व एनो अन्यकृतं भुजेम मा तत् कर्म वसवो यच्चयध्वे
विश्वस्य हि क्षयथ विश्वदेवाः स्वयं रिपुस्तन्वं रीरिषीष्ट
ऋ. 6.51.7

Page 148

अतिं वा यो मरुतो मन्यते नो ब्रह्म वा यः क्रियमाणं निनित्सात्
तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषमभि तं शोचतु द्यौः
ऋ. 6.52.2

विश्वा अग्नेऽपं दहारातीर्येभिस्तपोभिरदहो जरूथम्
प्र निस्वरं चातयस्वामीवाम्
ऋ. 7.1.7

त्वद् विश आयन्नसिक्नीरसमना जहतीर्भोजनानि
वैश्वानर पूरवे शोशुचानः पुरो यदग्ने दरयन्नदीदेः
ऋ. 7.5.3

इन्द्रासोमा समवशंसमभ्यघं तपुर्यस्तु चरुरग्निवाँ इव
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने
ऋ. 7.104.2

इन्द्रासोमा दुष्कृतो वव्रे अन्तरनारम्भणे तमसि प्र विध्यतम्
यथा नातः पुनरेकश्चनोदयत् तद् वामस्तु सहसे मन्युमच्छवः
ऋ. 7.104.3

ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो बदन्तः
संवत्सरस्य तदहः परि ष्ठ यन्मण्डूकाः प्रावृषीणं बभूव
ऋ. 7.104.7

Page 149

अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय
युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः
ऋ. 5.60.5

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 152

सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः
ऋ. 4.58.7

अभि प्रवन्त समनेव योषाः कल्याण्यः स्मयमानासो अग्निम्
घृतस्य धाराः समिधा नसन्त ता जुषाणो हर्यति जातवेदाः
ऋ. 4.58.8

उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये। सुमृळीका भवन्तु नः
ऋ. 6.52.9

तिस्रो वाचः प्र वद ज्योतिरग्रा या एतद् दुहे मधुदोघमूर्धः
स वत्सं कृण्वन् गभमोषधीनां सद्यो जातो वृषभो रोरवीति
ऋ. 7.101.1

Page 154

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्। यज्ञं दधे सरस्वती
ऋ. 1.3.11

Page 155

तस्या समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः
ततः क्षरत्यक्षरं तद् विश्वमुप जीवति
ऋ. 1.164.42

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति
ऋ. 1.164.45

यस्त स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि
या रत्नधा वसुविद यः सुदत्रः सरस्वति तमिह धातवे कः
ऋ. 1.164.49

Page 156

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरिदं सदन्तु
ऋ. 3.4.8

त्रिधा हितं पणिभिर्गुह्यमानं गावे देवासो घृतमन्वविन्दन्
इन्द्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः
ऋ. 4.58.4

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु
ऋ. 8.100.11

अस्येदेषा सुमतिः पप्रथाना ऽभवत् पूर्व्या भूमना गौः
अस्य सनीळा असुरस्य योनौ समान आ भरणे बिभ्रमाणाः
ऋ. 10.121.6

Page 157

बृहस्पते प्रथमं वाचो अग्रं यत् प्रैरत नामधेयं दधानाः
यदेषां श्रेष्ठं यदरिप्रमासीत् प्रेणा तदेषां निहितं गुहाविः
ऋ. 10.71.1

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि
ऋ. 10.71.2

उत त्वः पश्यन् न ददर्श वाचमुत त्वः शृण्वन् न शृणोत्येनाम्
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः
ऋ. 10.71.4

Page 158

दूराच्चकमानायं प्रतिपाणायाक्षये
आस्मा अशृण्वन्नाशाः कामेनाजनयन्स्त्र्यः
अ. 19.52.3

Page 160

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम्
ऋ. 10.71.5

यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति
यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम्
ऋ. 10.71.6

हृदा तष्टेषु मनसो जवेषु यद्ब्राह्मणाः संयजन्ते सखायः
अत्राह त्वं वि जहुर्वेद्याभिरोहब्रह्माणो वि चरन्त्युत्वे
ऋ. 10.71.8

इमे ये नार्वाङ्न परश्चरन्ति न ब्राह्मणासो न सुतेकरासः
त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञयः
ऋ. 10.71.9

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 161

सन्तेमनोमनसा सम्प्राणः प्राणेनगच्छताम्

य. 6.18

इयं वां ब्रह्मणस्पते सुवृक्तिर्ब्रह्मेन्द्राय वज्रिणे अकारि
अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः

ऋ. 7.97.9

शृण्वन्तु विश्वे अमृतस्य पुत्राः

य. 11.5

यथेमां वाचं कल्याणीमावदानि जनेभ्यः
ब्रह्मराजन्याभ्याꣳ शूद्राय चार्याय च स्वाय चारणाय च

य. 26.2

उपहूतो वाचस्पतिरुपास्मान् वाचस्पतिर्ह्वयताम्
सं श्रुतेन गमेमहि मा श्रुतेन वि राधिषि

अ. 1.1.4

Page 162

आपूर्वेणोषिता वाचस्ता वदन्ति यथायथम्
वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणम्महत्

अ. 10.8.33

श्रुत्कर्णाय कवये वेद्याय वचोभिर्वाकैरुप यामि रातिम्
वतो भयमभयं तन्नो अस्त्ववं देवानां यज हेडो अग्ने

अ. 19.3.4

सोमं गीर्भिष्ट्वा वयं वर्धयामो वयोविदः
सुमृळीको न आ विश

ऋ. 1.91.11

Page 164

द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः

अ. 9.9.13

साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि
विद्वाँ अस्य व्रता ध्रुवा वया इवानु रोहते

ऋ. 2.5.4

ऋतेन ऋतं नियतमीळ आ गोरामा सचा मधुमत् पक्वमग्ने
कृष्णा सती रुशता धासिनैषा जामर्येण पयसा पीपाय

ऋ. 4.3.9

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति
ऋतं शंसन्त ऋतमित् त आहुरनु व्रतं व्रतपा दीध्यानाः
ऋ. 3.4.7

कुथा महामवृधत् कस्य होतुर्यज्ञं जुषाणो अभि सोममूधः
पिबन्नुशानो जुषमाणो अन्धो ववक्ष ऋष्वः शुचते धनाय
ऋ. 4.23.1

Page 165

ऋतस्य हि शुरुधः सन्ति पूर्वीर्ऋतस्य धीतिर्वृजिनानि हन्ति
ऋतस्य श्लोको बधिरा ततर्द कर्णा बुधानः शुचमान आयोः
ऋ. 4.23.8

प्र सप्तगुमृतधीतिं सुमेधां बृहस्पतिं मतिरच्छा जिगाति
य आङ्गिरसो नमसोपसद्यो ऽस्मभ्यं चित्रं वृषणं रयिं दाः
ऋ. 10.47.6

श्रत्ते दधामि प्रथमाय मन्यवे ऽहन्यद्वृत्रं नर्यं विवेरपः
उभे यत्त्वा भवतो रोदसी अनु रेजते शुष्मात् पृथिवी चिदद्रिवः
ऋ. 10.147.1

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु
अ. 12.1.1

यदग्ने तपसा तप उपतप्यामहे तपः
प्रियाः श्रुतस्य भूयास्मायुष्मन्तः सुमेधसः[1]
अ. 7.61.1

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः
अ. 14.1.1

Page 166

ऋतस्य पन्थामनु पश्य साध्वङ्गिरसः सुकृतो येन यन्ति
तेभिर्याहि पथिभिः स्वर्गं यत्रादित्या मधु भक्षयन्ति तृतीये
नाके अधि वि श्रयस्व
अ. 18.4.3

बृहस्पतिष्ट्वा सुम्ने रम्णातु
य. 4.21

स्वस्ति ते देव सोम सुत्यामशीय
य. 5.7

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

वि स्वः पश्य व्युन्तरिक्षं[2]
य. 7.45

वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः[1]
य. 9.18

यो देवानां चरसि प्राणथेन कस्मै देव वषडस्तु तुभ्यम्[2]
य. 11.39

वि या जानाति जसुरिं वि तृष्यन्तं वि कामिनम्
देवत्रा कृणुते मनः
ऋ. 5.61.7

Page 167

समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ् विश्वानि भुवनान्यस्थात्
होता पावकः प्रदिवः सुमेधा देवो देवान् यजत्वग्निरर्हन्
ऋ. 2.3.1

अजो भागस्तपसा तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः
यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकम्
ऋ. 10.64.4

इन्द्राग्नी तमपनुदतां योऽस्मान्द्वेष्टि
य. 2.15

संबर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्वसुभिः सम्मरुद्भिः
समिन्द्रो विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत् स्वाहा[1]
य. 2.22

Page 169

यद्द्यावः इन्द्र ते शतं शतं भूमीरुत स्युः
न त्वा वज्रिन् त्सहस्रं सूर्या अनु न जातमष्ट रोदसी
ऋ. 8.70.5

Page 170

आयुर्यज्ञेन कल्पतां[1] प्राणो यज्ञेन कल्पतां[2]
चक्षुर्यज्ञेन कल्पता[3]ꣳ श्रोत्रं यज्ञेन कल्पतां[4]
पृष्ठं यज्ञेन कल्पतां[5] यज्ञो यज्ञेन कल्पताम्[6]
प्रजापतेः प्रजा अभूम[7] स्वर्देवा अगन्मा[8]मृतां
अभूम[9]
य. 9.21

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

इमं नो देव सवितर्यज्ञं प्र णय
य. 11.8

भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः
भद्रा उत प्रशस्तयः
सा. 111

आग्ने स्थूरं रयिं भर पृथुं गोमन्तमश्विनम्
अङ्धिः खं वर्तया पणिम्
सा. 1529

नाहं तन्तुं न वि जानाम्योतुं न यं वयन्ति समरेऽतमानाः
कस्य स्वित् पुत्र इह वक्त्वानि परो वदात्यवरेण पित्रा
ऋ. 6.9.2

Page 171

अयं मे पीत उदियर्ति वाचमयं मनीषामुशतीमजीगः
अयं षळुर्वीरमिमीत धीरो न याभ्यो भुवनं कच्चनारे
ऋ. 6.47.3

अयं विदच्चित्रदृशीकमर्णः शुक्रसद्मनामुषसामनीके
अयं महान्महता स्कम्भनेनोद् द्यामस्तभ्नाद् वृषभो मरुत्वान्
ऋ. 6.47.5

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः
ऋ. 9.1.1

रक्षोहा विश्वचर्षणिरभि योनिमयोहतम्। द्रुणा सधस्थमासदत्
ऋ. 9.1.2

अभ्यर्ष महानां देवानां वीतिमन्धसा अभि वाजमुत श्रवः
ऋ. 9.1.4

Page 172

पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता। वारेण शश्वता तना
ऋ.9.1.6

गोषा इन्दो नृषा असि अश्वसा वाजसा उत
आत्मा यज्ञस्य पूर्व्यः
ऋ. 9.2.10

तमीमण्वीः समर्य आ गृभ्णन्ति योषणो दश। स्वसारः पार्ये दिवि
ऋ. 9.1.7

महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः
यद्गोभिर्वासयिष्यसे
ऋ. 9.2.4

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अचिक्रदद्वृषा हरिर्महान् मित्रो न दर्शतः सं सूर्येण रोचते

ऋ. 9.2.6

Page 173

गिरस्त इन्द्र ओजसा मर्मृज्यन्ते अपस्युवः याभिर्मदाय शुम्भसे

ऋ. 9.2.7

एष देवो अमर्त्यः पर्णवीरिव दीयति। अभि द्रोणान्यासदम्

ऋ. 9.3.1

एष देवो विपा कृतो ऽति ह्वरांसि धावति। पवमानो अदाभ्यः

ऋ. 9.3.2

ऋतस्य दृंहा धरुणानि सन्ति पुरूणि चन्द्रा वपुषे वपूंषि
ऋतेन दीर्घमिषणन्त पृक्षं ऋतेन गावं ऋतमा विवेशुः

ऋ. 4.23.9

एष देवो रथर्यति पवमानो दशस्यति। आविष्कृणोति वग्वनुम्

ऋ. 9.3.5

Page 174

एष दिवं वि धावति तिरो रजांसि धारया। पवमानः कनिक्रदत्

ऋ. 9.3.7

आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः
प्रत्नं नि पाति काव्यम्

ऋ. 9.6.8

Page 175

वेदाहं सूत्रं विततं यस्मिन्नोताः प्रजा इमाः
सूत्रं सूत्रस्याहं वेदाथो यद् ब्राह्मणं महत्

अ. 10.8.38

Page 176

भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात्[1]

य. 36.3

नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते
दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः

सा. 54

तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः

ऋ. 1.154.5

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

उत्तरेणव गायत्रीममृतेऽधि विचक्रमे।
साम्नाय सामं संविदुरजुस्तद् ददृशे क्वं।।
अ. 10.8.41

Page 178

तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात्
सा. 1462

यस्ते अग्ने नमसा यज्ञमीट्टे ऋतं स पात्यरुषस्य वृष्णः
तस्य क्षयः पृथुरा साधुरेतु प्रसन्नाणिस्य नहुषस्य शेषः
ऋ. 5.12.6

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः
ऋ. 5.81.1

इन्द्र मूळ मह्यं जीवातुमिच्छ चोदय धियमयसो न धाराम्
यत् किं चाहं त्वायुरिदं वदामि तज्जुषस्व कृधि मा देववन्तम्
ऋ. 6.47.10

यो वै तां ब्रह्मणो वेदामृतेनावृतां पुरम्
तस्मै ब्रह्म च ब्राह्माश्च चक्षुः प्राणं प्रजां ददुः
अ. 10.2.79

Page 179

या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः
ऋ. 10.81.5

यामृषयो भूतकृतो मेधां मेधाविनो विदुः
तया मामद्य मेधयाग्ने मेधाविनं कृणु
अ. 6.108.4

अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते
ततो भूय इव ते तमो य उ सम्भूत्याꣳ रताः
य. 40.9

विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते
य. 40.14

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम्
ओ३म् क्रतो स्मर। क्लिबे स्मर। कृतꣳ स्मर[1]
य. 40.15

प्र होत्रे पूर्व्यं वचो ऽग्नये भरता बृहत्
विपां ज्योतींषि बिभ्रते न वेधसे
सा. 98

Page 180

उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम्
उतोदिता मघवन्त्सूर्यस्य वयं देवानाꣳ सुगतौ स्याम
य. 34.37

Page 182

जज्ञानं सप्त मातरो वेधामशासत श्रिये
अयं ध्रुवो रयीणां चिकेत यत्
सा. 101

अभि त्वा वृषभा सुते सुतं सृजामि पीतये
तृम्पा व्यश्नुही मदम्
सा. 161

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् सनिं मेधामयासिषम्
सा. 171

नकिर्देवा मिनीमसि नकिरा योपयामसि मन्त्रश्रुत्यं चरामसि
पक्षेभिरपिकक्षेभिरत्राभि सं रभामहे
सा. 176

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः
सा. 189

मेधां सायं मेधां प्रातर्मेधां मध्यंदिनं परि
मेधां सूर्यस्य रश्मिभिर्वचसा वेशयामहे
अ. 6.108.5

Page 183

यो विद्यात् सूत्रंवितंतं यस्मिन्नेताः प्रजा इमाः
सूत्रं सूत्रस्य यो विद्यात् स विद्याद् ब्राह्मणं महत्
अ. 10.8.37

श्रमेण तपसा सृष्टा ब्रह्मणा वित्तर्ते श्रिता
अ. 12.5.1

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

इदं यत् परमेष्ठिनं मनो वां ब्रह्मसंशितम्
येनैव ससृजे घोरं तेनैव शान्तिरस्तु नः
अ. 19.9.4

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम्[1]
य. 2.24

यज्ञवाहसꣳ सुतीर्था नो असद्वशे[2]
ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु ते नः
पान्तु तेभ्यः स्वाहा
य. 4.11

धर्मणा[3]। ब्रह्मवनिं त्वा क्षत्रवनिं रायस्पोषवनिं पर्यूहामि[4]
ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह[5]
य. 5.27

अछिन्नस्यतेदेव सोम सुवीर्यस्यरायस्पोषस्यदातारः स्याम
स प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः
य. 7.14

Page 185
तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्
ऋ. 3.62.10

Page 186
बृहस्पतेरुत्तमं नाकꣳ रुहेयम्
य. 4.9.10

नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची
द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाः[1]
य. 12.2

सं ते पयाꣳसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः
आप्यायमानो अमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व[1]
य. 12.113

पृथिव्या अहमुदन्तरिक्षमाऽरुहमन्तरिक्षाद्दिवमारुहम्
दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम्[1]
य. 17.67

ऊर्ध्वो नः पाह्यꣳहसो नि केतुना विश्वं समत्रिणं दह
कृधी न ऊर्ध्वाञ्चरथाय जीवसे विदा देवेषु नो दुवः
ऋ. 1.36.14

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 187

वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा मदः। सत्यं वृषन् वृषेदसि
सा. 782

आयमगन्त्सविता क्षुरेणोष्णेन वाय उदकेनेहि
आदित्या रुद्रा वसव उन्दन्तु सचेतसः सोमस्य राज्ञो वपत प्रचेतसः
अ. 6.68.1

वेदाहं सूत्रं विततं यस्मिन्नोताः प्रजा इमाः
सूत्रं सूत्रस्याहं वेदाथो यद् ब्राह्मणं महत्
अ. 10.8.38

Page 188

यदग्ने मर्त्यस्त्वं स्यामहं मित्रमहो अमर्त्यः। सहसः सूनवाहुत
ऋ. 8.19.25

सत्यमुग्रस्य बृहतः सं स्रवन्ति संस्रवाः
सं यन्ति रसिनो रसाः पुनानो ब्रह्मणा हर इन्द्रायेन्दो परि स्रव
ऋ. 9.113.5

यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितम्
तस्मिन् मां धेहि पवमानाऽमृते लोके अक्षित इन्द्रायेन्दो परि स्रव
ऋ. 9.113.7

Page 190

यत्र राजा वैवस्वतो यत्रावरोधनं दिवः
यत्रामूर्यृह्वतीरापस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव
ऋ. 9.113.8

यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः
लोका यत्र ज्योतिष्मन्तस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव
ऋ. 9.113.9

यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते
कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव
ऋ. 9.113.11

Page 191

इहैधि पुरुष सर्वेण मनसा सह। दूतौ यमस्य मानु गा
अधि जीवपुरा इहि
अ. 5.30.6

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मृत्युरीशे द्विपदां मृत्युरीशे चतुष्पदाम्
तस्मात् त्वां मृत्योर्गोपतेरुद् भरामि स मा बिभेः
अ. 8.2.23

परं मृत्यो अनु परेहि पन्थां यस्ते एष इतरो देवयानात्
चक्षुष्मते शृण्वते ते ब्रवीमीहेमे वीरा बहवो भवन्तु
अ. 12.2.21

Page 193

अर्यमणं यजामहे सुबन्धुं पतिवेदनम्
उर्वारुकमिव बन्धनात् प्रेतो मुञ्चामि नामुतः
अ. 14.1.17

तस्य व्रात्यस्य। एकं तदेषाममृतत्वमित्याहुतिरेव
अ. 15.17.10

उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः
य. 3.60

यमाय त्वा मह्यं वरुणो ददातु सोऽमृतत्त्वमशीय
य. 7.47

Page 194

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते
तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्यो अभि चाकशीति
ऋ. 1.164.20

इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम्
ऋ. 1.32.1

वृषायमाणो ऽवृणीत सोमं त्रिकद्रुकेष्वपिबत् सुतस्य
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनाम्
ऋ. 1.32.3

Page 196

नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद् ध्रादुनिं च
इन्द्रश्च यद् युयुधाते अहिश्चोतापरीभ्यो मघवा वि जिग्ये
ऋ. 1.32.13

इन्द्रो यातोऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः
सेदु राजा क्षयति चर्षणीनामरान् न नेमिः परि ता बभूव
ऋ. 1.32.15

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अ॒भि सि॒ध्मो अ॑जिगादस्य॒ शत्रू॒न् वि ति॒ग्मेन॑ वृष॒भेणा॒ पुरो॑ऽभेत्
सं वज्रे॑णासृजद् वृ॒त्रमिन्द्रः॒ प्र स्वां म॒तिम॑तिर॒च्छाश॑दानः
ऋ. 1.33.13

अ॒ग्निना॑ तु॒र्वशं॒ यदुं॑ परा॒वत॑ उ॒ग्रादे॑वं हवामहे
अ॒ग्निर्न॑य॒न्नव॑वास्त्वं बृ॒हद्र॑थं तु॒र्वीतिं॒ दस्य॑वे॒ सहः॑
ऋ. 1.36.18

Page 197

विश्व॑मस्या नानाम॒ चक्ष॑से॒ जग॒ज् ज्योति॑ष्कृणोति सू॒नरी॑
अप॒ द्वेषो॑ म॒घोनी॑ दुहि॒ता दि॒व उ॒पा उ॑च्छ॒दप॒ स्रिधः॑
ऋ. 1.48.8

त्वं कर॑ञ्जमु॒त प॒र्णयं॑ वधी॒स्तेजि॑ष्ठयातिथि॒ग्वस्य॑ वर्त॒नी
त्वं श॒ता वङ्गृ॑दस्याभिन॒त् पुरो॑ ऽनानुदः परि॑षूता ऋ॒जिश्व॑ना
ऋ. 1.53.8

त्वं दि॒वो बृ॑ह॒तः सानु॑ कोप॒यो ऽव॒ त्मना॑ धृष॒ता शम्ब॑रं भिनत्
यन्मा॒यिनो॑ व्र॒न्दिनो म॒न्दिना॑ धृ॒षच्छि॒तां गभ॑स्तिम॒शनिं॑ पृत॒न्यसि॑
ऋ. 1.54.4

त्वं तमि॑न्द्र॒ पर्व॑तं॒ न भोज॑से म॒हो नृ॒म्णस्य॒ धर्म॑णामिरज्यसि
प्र वी॒र्ये॑ण दे॒वताति॑ चेकिते॒ विश्व॑स्मा उ॒ग्रः कर्म॑णे पु॒रोहि॑तः
ऋ. 1.55.3

Page 198

यस्मि॑न् वृ॒क्षे म॒ध्वदः॑ सुप॒र्णा नि॑वि॒शन्ते॒ सुव॑ते॒ चाधि॒ विश्वे॑
तस्येदा॑हः पिप्प॑लं स्वा॒द्वग्रे॒ तन्नोन्नश॒द्यः पि॒तरं॒ न वेद॑
ऋ. 1.164.22

अ॒नच्छ॑ये तुरगा॑तु जी॒वमेज॑द् धु॒वं मध्य॒ आ प॒स्त्या॑नाम्
जी॒वो मृ॒तस्य॑ चरति स्व॒धाभि॒रम॑र्त्यो॒ मर्त्ये॑ना॒ सयो॑निः
ऋ. 1.164.30

अप॑श्यं गो॒पामनि॑पद्यमान॒मा च॒ परा॑ च प॒थिभि॒श्चर॑न्तम्
स स॒ध्रीचीः॒ स विषू॑ची॒र्वसा॑न॒ आ व॑रीवर्ति॒ भुव॑नेष्व॒न्तः
ऋ. 1.164.32

अपा॒ङ् प्राङे॑ति स्व॒धया॑ गृभी॒तो ऽम॑र्त्यो॒ मर्त्ये॑ना॒ सयो॑निः
ता शश्व॑न्ता विषूचीना॑ वि॒यन्ता॒ न्य१॒॑न्यं चि॒क्युर्न नि चि॑क्युरन्यम्
ऋ. 1.164.38

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत्
यस्य शुष्माद् रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः
ऋ. 2.12.1

Page 199

यः पृथिवीं व्यथमानामदृंहद् यः पर्वतान् प्रकुपिताँ अरम्णात्
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात् स जनास इन्द्रः
ऋ. 2.12.2

अस्य मन्दानो मध्वो वज्रहस्तो ऽहिमिन्द्रो अर्णोवृतं वि वृश्चत्
प्र यद् वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चक्रमन्त
ऋ. 2.19.2

स रन्धयत् सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय
दिवोदासाय नवति च नवेन्द्रः पुरो व्यैरच्छम्बरस्य
ऋ. 2.19.6

एवा ते गृत्समदाः शूर मन्मावस्यवो न वयुनानि तक्षुः
ब्रह्मण्यन्त इन्द्र ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः
ऋ. 2.19.8

कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम्
सुमङ्गलश्च शकुने भवासि मा त्वा का चिदभिभा विश्व्या विदत
ऋ. 2.42.1

समुद्रेण सिन्धवो यादमाना इन्द्राय सोमं सुषुतं भरन्तः
अंशुं दुहन्ति हस्तिनो भरित्रैर्मध्वः पुनन्ति धारया पवित्रैः
ऋ. 3.36.7

Page 200

यदग्ने स्यामहं त्वं त्वं वा घा स्या अहम्
स्युष्टे सत्या इहाशिषः
ऋ. 8.44.23

Page 201

यो अग्निं तन्वो३ दमे देवं मर्तः सपर्यति
तस्मा इद दीदयद् वसु
ऋ. 8.44.15

Page 203

सुवीरस्ते जनिता मन्यत द्यौरिन्द्रस्य कर्ता स्वपस्तमो भूत्
य ईं जजान स्वर्यं सुवज्रमनपच्युतं सदसो न भूमं
ऋ. 4.17.4

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

न्यस्मै देवी स्वधितिर्जिहीत इन्द्राय गातुरुशतीव येमे
सं यदोजो युवते विश्वमाभिरनु स्वधावne क्षितयो नमन्त
ऋ. 5.32.10

प्र श्येनो न मंदिरमंशुमस्मै शिरो दासस्य नमुचेर्मथायन्
प्रावन्नमीं साप्यं ससन्तं पृणग्राया समिषा सं स्वस्ति
ऋ. 6.20.6

Page 204

वि मे कर्णा पतयतो वि चक्षुर्वीऽदं ज्योतिर्हृदय आहितं यत्
वि मे मनश्चरति दूरआधीः किं स्विद् वक्ष्यामि किमु नू मनिष्ये
ऋ. 6.9.6

अनु प्रत्नास आयवः पदं नवीयो अक्रमुः। रुचे जनन्त सूर्यम्
ऋ. 9.23.2

अक्षेत्रवित् क्षेत्रविदं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः
एतद्वै भद्रमनुशासनस्योत श्रुतिं विन्दत्यञ्जसीनाम्
ऋ. 10.32.7

Page 205

ब्रह्मचारीष्णंश्चरति रोदसी उभे तस्मिन् देवाः संमनसो भवन्ति
स दाधार पृथिवीं दिवं च स आचार्यं तपसा पिपर्ति
अ. 11.5.1

आचार्य उपनयमानो ब्रह्मचारिणं कृणते गर्भमन्तः
तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः
अ. 11.5.3

इयं समित् पृथिवि द्यौर्द्वितीयोतान्तरिक्षं समिधा पृणाति
ब्रह्मचारी समिधा मेखलया श्रमेण लोकांस्तपसा पिपर्ति
अ. 11.5.4

Page 206

श्रद्धया सत्यमाप्यते
य. 19.30

का ईमरे पिशङ्गिला का ईं कुरुपिशङ्गिला
का ईमास्कन्दमर्षति का ईं पन्थां वि सर्पति
य. 23.55

अजारे पिशङ्गिला श्वावित्कुरुपिशङ्गिला
शश आस्कन्दमर्षत्यहिः पन्थां वि सर्पति
य. 23.56

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि। एता जुषत मे गिरः
ऋ. 1.25.18

Page 207

अग्नेः प्रियं पाथोऽपीतम्[2]
य. 2.17

अगन्म स्वः सं ज्योतिषाभूम[3]
य. 2.25

अग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहि
य. 4.14

रक्षा णो अप्रयुच्छन् प्रबुधे नः पुनस्कृधि[1]
अग्नावग्निश्चरति प्रविष्ट
य. 5.4

पृष्ठात् पृथिव्या अहमन्तरिक्षमारुहमन्तरिक्षाद् दिवमारुहम्
दिवो नाकस्य पृष्ठात् स्वः[1] ज्योतिरगामहम्
अ. 4.14.3

यज्ञं यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा[1]
य. 8.22

Page 208

अहं सूर्यस्य परि याम्याशुभिः प्रैतशेभिर्वहमान ओजसा
यन्मा सावो मनुष आहं निर्णिज ऋधक् कृषे दासं कृत्व्यं हथैः
ऋ. 10.49.7

अभि द्यां महिना भुवमभीꣳमां पृथिवीं महीम्
कुवित् सोमस्यापामिति
ऋ. 10.119.8

विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय
य. 31.18

रोहितो दिवमारुहत् तपसा तपस्वी
स योनिमैति स उ जायते पुनः स देवानामधिपतिर्बभूव
अ. 13.2.25

असंतापं मे हृदयमुर्वी गव्यूतिः समुद्रो अस्मि विधर्मणा
बृहस्पतिर्म आत्मा नृमणा नाम हृद्यः
अ. 16.3.6

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 209

नहि मे रोदसी उभे अन्यं पक्षं चन प्रति
कुवित् सोमस्यापामिति
ऋ. 10.119.7

पर्यावर्त दुःष्वप्न्यात् पापात् स्वप्न्यादभूत्याः
ब्रह्माहमन्तरं कृण्वे परा स्वप्नमुखाः शुचः
अ. 7.100.1

अवासृजन्त जिव्रयो न देवा भुवः सम्राळिन्द्र सत्ययोनिः
अहन्नहिं परिशयानमर्णः प्र वर्तनीरर्दो विश्वधेनाः
ऋ. 4.19.2

शुनश्चिच्छेपं निदितं सहस्राद् यूपादमुञ्चो अशमिष्ट हि षः
एवास्मदग्ने वि मुमुग्धि पाशान् होतश्चिकित्व इह तू निषद्य
ऋ. 5.2.7

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यम श्रथाय
अधा वयमादित्य व्रते तवानागसो अदितये स्याम
अ. 7.83.3

Page 210

अरं मे गन्तं हवनायास्मै गृणाना यथा पिबाथो अन्धः
परि ह त्यद् वर्तिर्याथो रिषो न यत् परो नान्तरस्तुतुर्यात
ऋ. 6.63.2

Page 211

अपां मध्ये तस्थिवांसं तृष्णाविद्ज्जरितारम्। मूळा सुक्षत्र मूळय
ऋ. 7.89.4

Page 212

वयं सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान् निधयेव बद्धान्
ऋ. 10.73.11

ब्रह्म होता ब्रह्मा यज्ञा ब्रह्मणा स्वरवो मिताः
अध्वर्युर्ब्रह्मणो जातो ब्रह्मणोऽन्तर्हितं हविः
अ. 19.42.1

३ ३ ३ २ ३ १ २ ३ २ ३ १ र
इत एत उदारुहन्दिवः पृष्ठान्या रुहन्
२ ३ २ १ १ २ ३ १ २र
प्र भूर्जयो यथा पथोद्यामङ्गिरसो ययः
सा. 92

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे
मित्रस्य चक्षुषा समीक्षामहे[1]

य. 36.18

Page 213

यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति
सर्वभूतेषु चात्मानं ततो न वि चिकित्सति[1]

य. 40.6

त्वेषं रूपं कृणुत उत्तरं यत् संपृञ्चानः सदने गोभिरद्भिः
कपिर्बुध्नं परि मर्मृज्यते धीः सा देवताता समितिर्बभूव

ऋ. 1.95.8

यत्संवत्समृभवो गामरक्षन् यत् संवत्समृभवो अपिंशन्
यत् संवत्सम भरन् भासो अस्यास्ताभिः शमीभिरमृतत्वमाशुः

ऋ. 4.33.4

Page 217

स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः
इन्द्रो विश्वा अति द्विषः

ऋ. 8.16.11

Page 218

तं त्वा गोर्भिरुरुक्षया हव्यवाहं समीधिरे। यजिष्ठं मानुषे जने

ऋ. 1.117.9

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्
समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि

ऋ. 10.191.3

समानी व आकूतिः समाना हृदयानि वः
समानमस्तु वो मनो यथा वः सुसहासति

ऋ. 10.191.4

यदुत्तमे मरुतो मध्यमे वा यद् वावमे सुभगासो दिवि ष्ठ
अतो नो रुद्रा उत वा न्वस्याग्ने वित्ताद्धविषो यद् यजाम

ऋ. 5.60.6

Page 219

मोघमत्र विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत् स तस्य
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी

ऋ. 10.117.6

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ते अंज्येष्ठा अकनिष्ठास उद्भिदो ऽमध्यमासो महसा वि वावृधुः
सुजातासो जनुषा पृश्निमातरो दिवो मर्या आ नो अच्छा जिगातन
ऋ. 5.59.6

कूपन्नित् फाल आशितं कृणोति यन्नध्वानमप वृङ्क्ते चरित्रैः
वदन् ब्रह्मावदतो वनीयान् पृणन्नापिरपृणन्तमभि ष्यात्
ऋ. 10.117.7

समानी व आकूतिः समाना हृदयानि वः
समानमस्तु वो मनो यथा वः सुसहासति
ऋ. 10.191.4

Page 220

समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि
सम्यञ्चोऽग्निं सपर्यतारा नाभिमिवाभितः
अ. 3.30.6

स्वादुष्संदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः
चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः
ऋ. 6.75.9

नहि वो अस्त्यर्भको देवासो न कुमारकः। विश्वे सतोमहान्त इत
ऋ. 8.30.1

संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ
इळस्पदे समिध्यसे स नो वसून्या भर
ऋ. 10.191.1

Page 221

सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्
देवा भागं यथा पूर्वे संजानाना उपासते
ऋ. 1.191.2

न किल्बिषमत्र नाधारो अस्ति न यन्मित्रैः सममंमान एति
अनूनं पात्रं निहितं न एतत् पक्तारं पक्वः पुनरा विशाति
अ. 12.3.48

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः
अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या
अ. 3.30.1

समानो मन्त्रः समितिः समानी समानं व्रतं सह चित्तमेषाम्
समानेन वो हविषा जुहोमि समानं चेतो अभिसंविशध्वम्
अ. 6.64.2

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 222

स्वस्ति पन्थामनु चरेम सूर्याचन्द्रममसाविव
पुनर्ददताघ्नता जानता सं गमेमहि
ऋ. 5.51.15

Page 223

स नः शक्रश्चिदा शकद् दानवाँ अन्तराभरः
इन्द्रो विश्वाभिरूतिभिः
ऋ. 8.32.12

Page 224

सध्रीचीनान् वः संमनसस्कृणोम्येकश्नुष्टीन्त्संवननेन सर्वान्
देवा इवामृतं रक्षमाणाः सायंप्रातः सौमनसो वो अस्तु
अ. 3.30.7

ब्रह्म गामश्वं जनयन्त ओषधीर्वनस्पतीन् पृथिवीं पर्वताँ अपः
सूर्यं दिवि रोहयन्तः सुदानव आर्या व्रता विसृजन्तो अधि क्षमि
ऋ. 10.65.11

यदन्तरं तद् बाह्यं यद् बाह्यं तदन्तरम्
कन्याऽनां विश्वरूपाणां मनो गृभायौषधे
अ. 2.30.4

आकूत्या नो बृहस्पत आकूत्या न उपा गहि
अथो भगस्य नो धेह्यथो नः सुहवो भव
अ. 19.4.3

अग्ने ब्रह्म गृभ्णीष्व[1]
य. 1.18

इन्द्रो वीर्यमकृणोदूर्ध्वोऽध्वर आस्थात्[3]
य. 2.8

Page 225

भा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः[1]
य. 16.15

२उ ३ १ २ ३.२उ ३ १ २
त्वँह्योहि चेरवे विदा भगं वसुत्तये
१ २ ३ १ २ ३ २उ १ २
उद्वावृषस्व मघवन् गविष्टय उदिन्द्राश्वमिष्टये
सा. 240

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ज्यायांसमस्य यतुनस्य केतुनं ऋषिस्वरं चरति यासु नाम ते
यादृश्मिन् धायि तमपस्ययां विदद् य उं स्वयं वहते सो अरं करत्
ऋ. 5.44.8

भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहः
अवं स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टिभिः
ऋ. 8.19.20

त्रातारो देवा अधि वोचता नो मा नो निद्रा ईशत मोत जल्पिः
वयं सोमस्य विश्वहं प्रियासः सुवीरासो विदथमा वदेम
ऋ. 8.48.14

सहस्रधारे वितते पवित्र आ वाचं पुनन्ति कवयो मनीषिणः
रुद्रास एषामिषिरासो अद्रुहः स्पशः स्वञ्चः सुदृशो नृचक्षसः
ऋ. 9.73.7

यथाहान्यनुपूर्वं भवन्ति यथर्तवं ऋतुभिर्यन्ति साकम्
यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषाम्
अ. 12.2.25

Page 226

अक्ष्यौर्नौ मधुसंकाशे अनीकं नौ समञ्जनम्
अन्तः कृणुष्व मां हृदि मन इन्नौ सहासति
अ. 7.36.1

इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतं
क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वस्तकौ
अ. 14.1.22

Page 227

स्योनाद्योनेरधि बुध्यमानौ हसामुदौ महसा मोदमानौ
सुगू सुपुत्रौ सुगृहौ तराथो जीवावुषसो विभातीः
अ. 14.2.43

सुमङ्गली प्रतरणी गृहाणां सुशेवा पत्ये श्वशुराय शंभूः
स्योना श्वश्रवै प्र गृहान् विशेमान्
अ. 14.2.26

प्र बुध्यस्व सुबुधा बुध्यमाना दीर्घायुत्वाय शतशारदाय
गृहान् गच्छ गृहपत्नी यथासो दीर्घं त आयुः सविता कृणोतु
अ. 14.2.75

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 228

प्रेतो मुञ्चामि नामुतः सुबद्धाममुतस्करम्
यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगासति
ऋ. 10.85.25

इयमग्ने नारी पातिं विदेष्ट सोमो हि राजा सुभगां कृणोति
सुवाना पुत्रान् महिषी भवाति गत्वा पतिं सुभगा वि राजतु
अ. 2.36.3

अहं वि ष्यामि मयि रूपमस्या वेददित् पश्यन् मनसः कुलायम्
न स्तेयमद्मि मनसोदमुच्ये स्वयं श्रथ्नानो वरुणस्य पाशान्
अ. 14.1.57

Page 229

गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रत एमसि
ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः
य. 3.41

यज्ञस्य शिवे संतिष्ठस्व स्विष्टे मे संतिष्ठस्व[2]
य. 2.19

देहि मे ददामि ते नि मे धेहि नि त दधे
निहारं च हरासि मे निहारं नि हराणि ते स्वाहा[1]
य. 3.50

जातवेदसौ शिवौ भवतमद्य नः÷
य. 5.3

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः
य. 8.4

Page 230

मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया
अ. 3.30.3

ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयन्तः सधुराश्चरन्तः
अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीनान् वः संमनसस्कृणोमि
अ. 3.30.5

न यस्य सातुर्जनितोरवारि न मातरापितरा नू चिदिष्टौ
अधा मित्रो न सुधितः प वकोऽ ऽग्निर्दीदाय मानुषीषु विक्षु
ऋ. 4.6.7

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 231

त्वमर्यमा भवसि यत् कनीनां नाम स्वधावन् गुह्यं बिभर्षि
अञ्जन्ति मित्रं सुधितं न गोभिर्यद् दंपती समनसा कृणोषि
ऋ. 5.3.2

इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा सं स्पृशन्ताम्
अनश्रवो अनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे
अ. 12.2.31

या ओषधयो या नद्योऽ यानि क्षेत्राणि या वना
तास्त्वा वधु प्रजावतीं पत्ये रक्षन्तु रक्षसः
अ. 14.2.71

शचीभिर्नः शचीवसू दिवा नक्तं दशस्यतम्
मा वां रातिरुप दसत् कदा चनास्मद् रातिः कदा चन
सा. 287

Page 233

आपो न सिन्धुमभि यत् समक्षरन् त्सोमास इन्द्रं कुल्या इव ह्रदम्
वर्धन्ति विप्रा महो अस्य सादने यवं न वृष्टिर्दिव्येन दानुना
ऋ. 10.43.6

Page 234

द्रविणोदा ददातु नो वसूनि यानि शृण्विरे। देवेषु ता वनामहे
ऋ. 1.15.8

द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत। नेष्ट्रादृतुभिरिष्यत
ऋ. 1.15.9

नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति
तस्मा आपो घृतमर्षन्ति सिन्धवस्तस्मा इयं दक्षिणा पिन्वते सदा
ऋ. 1.125.5

दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः
दक्षिणावन्तो अमृतं भजन्ते दक्षिणावन्तः प्रतिरन्त आयुः
ऋ. 1.125.6

इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम्
ऋ. 2.21.6

समीं पणेरजति भोजनं मुषे वि दाशुषे भजति सूनरं वसु
दुर्गे चन ध्रियते विश्व आ पुरु जनो यो अस्य तविषीमचुक्रुधत्
5ऋ. 5.34.7

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 235

विसर्माणं कृणुहि वित्तमेषां ये भुञ्जते अपृणन्तो न उक्थैः
अपव्रतान् प्रसवे वावृधानान् ब्रह्मद्विषः सूयाद् यावयस्व
ऋ. 5.42.9

वेमि त्वा पूपन्नृञ्जसे वेमि स्तोतव आघृणे
न तस्य वेम्यरणं हि तद् वसो स्तुषे पज्राय साम्ने
ऋ. 8.4.17

परि चिन्मर्तो द्रविणं ममन्याद्ऋतस्य पथा नमसा विवासेत्
उत स्वेन क्रतुना सं वदेत श्रेयाँसं दक्षं मनसा जगृभ्यात्
ऋ. 10.31.2

अक्षैर्मा दीव्यः कृषिमित् कृषस्व वित्ते रमस्व बहु मन्यमानः
तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः
ऋ. 10.34.15

न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः
अपास्मात् प्रेयान्न तदोको अस्ति पृणन्तमन्यमरणं चिदिच्छेत्
ऋ. 10.117.4

पृणीयादिन्नाधमानाय तव्यान् द्राघीयांसमनु पश्येत पन्थाम्
ओ हि वर्तन्ते रथ्येव चक्रा ऽन्यमन्यमुप तिष्ठन्त रायः
ऋ. 10.117.5

Page 236

एता एना व्याकरं खिले गा विष्ठिता इव
रमन्तां पुण्या लक्ष्मीर्याः पापीस्ता अनीनशम्
अ. 7.115.4

शतहस्त समाहर सहस्रहस्त सं किर
कृतस्य कार्यस्य चेह स्फातिं समावह
अ. 3.24.5

यन्तासि यच्छसे हस्तावप रक्षांसि सेधसि
प्रजां धनं च गृहणानः परिहस्तो अभूदयम्
अ. 6.81.1

या मा लक्ष्मीः पतयालूरजुष्टाभिचस्कन्द वन्देनेव वृक्षम्
अन्यत्रास्मत् सवितस्तामितो धा हिरण्यहस्तो वसु नो रराणः
अ. 7.115.2

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 237

न वा उं देवाः क्षुधमिद्वधं ददुरुताशितमुपं गच्छन्ति मृत्यवंः
उतो रयिः पृणतो नोपं दस्यत्युतापृणन् मर्डितारं न विन्दते
ऋ. 10.117.1

य आध्रायं चकमानायं पित्वो ऽन्नवान्त्सन् रंफितायोपजग्मुषेंं
स्थिरं मनंः कृणुते सेवंते पुरोतो चित् स मंर्डितारं न विन्दते
ऋ. 10.117.2

स इद्भोजो यो गृहवे ददात्यन्नकामाय चरंते कृशायं
अरंमस्मै भवति यामंहूता उतापरीषु कृणुते सखायम्
ऋ. 10. 117.3

सुनोतां सोमपात्रे सोमिन्द्रांय वज्रिणें
पचंता पक्तीरवंसे कृणुध्वमित् पृणन्नित् पृणते मयंः
सा. 285

मा पृणन्तो दुरितमेन आरन् मा जारिषुः सूरयंः सुव्रतासंः
अन्यस्तेषां परिधिरंस्तु कश्चिदपृणन्तमभि सं यंन्तु शोकाः
ऋ. 1.125.7

Page 238

त्वां विशो वृणतां राज्याय त्वामिभाः प्रदिशः पञ्च देवीः
वर्ष्मन् राष्ट्रस्य ककुदि श्रयस्व ततो न उग्रो वि भजा वसूनि
अ. 3.4.2

सिंहप्रतीको विशो अद्धि सर्वा व्याघ्रप्रतीकोऽवं बाधस्व शत्रून्
एकवृष इन्द्रसखा जिगीवां छत्रूयतामा खिदा भोजनानि
अ. 4.22.7

सोऽरज्यत ततो राजन्योऽजायत
स विशः सबन्धूनन्नाद्यमभ्युदंतिष्ठत
अ. 15.8.1,2

Page 239

स विशोऽनु व्यचलत्
अ. 15.9.1

तं सभा च समितिश्च सेना च सुरा चानुव्यचलन्
अ. 15.9.2

सभायाश्च वै स समितेश्च सुरायाश्च
प्रियं धामं भवति य एवं वेदं
अ. 15.9.3

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः
विश्वा इदंस्माद् ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते
ऋ. 2.23.5

न स जीयते मरुतो न हन्यते न स्रेधति न व्यथते न रिष्यति
नास्य राय उप दस्यन्ति नोतय ऋषिं वा यं राजानं वा सुषूदथ
ऋ. 5.54.7

शिवो भूत्वा मह्यमग्ने अथो सीद शिवस्त्वम्
य. 12.17

शास इत्था महाँ असुरमित्रखादो अद्भुतः
न यस्य हन्यते सखा न जीयते कदा चन
ऋ. 10.152.1

Page 240

धारावरा मरुतो धृष्णवोजसो मृगा न भीमास्तविषीभिरर्चिनः
अग्नयो न शुशुचाना ऋजीषिणो भूमिं धमन्तो अप गा अवृण्वत
ऋ. 2.34.1

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम
ऋ. 6.75.3

वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना
योषेव शिङ्क्ते वितताधि धन्वञ्जया इयं समने पारयन्ती
ऋ. 6.75.3

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे
अप शत्रून् विध्यतां संविदाने आर्ती इमे विष्फुरन्ती अमित्रान्
ऋ. 6.75.4

Page 241

सुपर्णं वस्ते मृगो असया दन्तो गोभिः संनद्धा पतति प्रसूता
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन्
ऋ. 6. 75.11

ऋजीते परि वृङ्धि नो ऽश्मा भवतु नस्तनूः
सोमो अधि ब्रवीतु नो ऽदितिः शर्म यच्छतु
ऋ. 6.75.12

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

या जङ्घन्ति सान्वेषां जघनाँ उप जिघ्नते
अश्वाजनि प्रचेतसोऽश्वान् त्समत्सु चोदय
ऋ. 6.75.13

स्वायुधास इष्मिणः सुनिष्का उत स्वयं तन्वः शुम्भमानाः
ऋ. 7.56.11

समानमञ्जयेषां वि भ्राजन्ते रुक्मासो अधि बाहुषु। दविद्युतत्यृष्टयः
ऋ. 8.20.11

त उग्रासो वृषण उग्रबाहवो नकिष्टनूषु येतिरे
स्थिरा धन्वान्यायुधा रथेषु वो ऽनीकेष्वधि श्रियः
ऋ. 8.20.12

Page 242

ये गोमन्तं वाजवन्तं सुवीरं रयिं धत्थ वसुमन्तं पुरुक्षुम्
ते अग्रेपा ऋभवो मन्दसाना अस्मे धत्त ये च रातिं गृणन्ति
ऋ. 4.34.10

उप नो वाजा अध्वरमृभुक्षा देवा यात पथिभिर्देवयानैः
यथा यज्ञं मनुषो विक्ष्वाऽसु दधिध्वे रण्वाः सुदिनेष्वह्नाम्
ऋ. 4.37.1

त्र्युदायं देवहितं यथा वः स्तोमो वाजा ऋभुक्षणो ददे वः
जुह्वे मनुष्वदुपरासु विक्षु युष्मे सचा बृहद्दिवेषु सोमम्
ऋ. 4.37.3

ऋभुमृभुक्षणो रयिं वाजे वाजिन्तमं युजम्
इन्द्रस्वन्तं हवामहे सदासातममश्विनम्
ऋ. 4.37.5

Page 243

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्या÷ शूर
इषव्योऽतिव्याधो महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशु : सप्ति :
पुरन्धिर्योषा जिष्णू रथेष्ठा : सभेयो युवास्य यजमानस्य वीरो जायता
न्निकामे-निकामे न : पर्जन्यो वर्षतु फलवत्यो न ओषधय : पच्यन्तां
योगक्षेमो नः कल्पताम्
य. 22.22

Page 245

द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे। यज्ञेषु देवमीळते
ऋ. 1.15.7

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अर्थमिद वा उ अर्थिन आ जाया युवते पतिम्
तुञ्जाते वृष्ण्यं पयः परिदाय रसं दुहे वित्तं मे अस्य रोदसी
ऋ. 1.105.2

तमित् पृच्छन्ति न सिमो वि पृच्छति स्वेनेव धीरो मनसा यदग्रभीत्
न मृष्यते प्रथमं नापरं वचो ऽस्य क्रत्वा सचते अप्रदृपितः
ऋ. 1.145.2

मधोर्धारामनु क्षर तीव्रः सधस्थमासदः। चारुर्ऋतायं पीतये
ऋ. 9.17.8

यत् ते दिवं यत् पृथिवीं मनो जगाम दूरकम्
तत् त आ वर्तयामसीह क्षयाय जीवसे
ऋ. 10.58.2

Page 246

यत् ते भूतं च भव्यं च मनो जगाम दूरकम्
तत् त आ वर्तयामसीह क्षयाय जीवसे
ऋ. 10.58.12

चित्पतिर्मा पुनातु
य. 4.4

परीदं वासो अधिथाः स्वस्तयेऽभूर्गृष्टीनामभिशस्तिपा उ
शतं च जीव शरदः पुरूची रायश्च पोषमुपसंव्ययस्व
अ. 2.13.3

एह्यश्मानमा तिष्ठाश्मा भवतु ते तनूः
कृण्वन्तु विश्वे देवा आयुष्टे शरदः शतम्
अ. 2.13.4

मरीचीर्धूमान् प्र विशानु पाप्मन्नुदारान् गच्छोत वा नीहारान्
नदीनां फेनाँ अनु तान् वि नश्य भ्रूणघ्नि पूषन् दुरितानि मृक्ष्व
अ. 6.113.2

अनृणा अस्मिन्ननृणाः परस्मिन् तृतीये लोके अनृणाः स्याम
ये देवयानाः पितृयाणाश्च लोकाः सर्वान् पथो अनृणा आ क्षियेम
अ. 6.117.3

उद्यानं ते पुरुष नावयानं जीवातुं ते दक्षतातिं कृणोमि
अ. 8.10.6

Page 247

इदमहमनृतात्सत्यमुपैमि
य. 1.5

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

नमो॑ दे॒वेभ्य॑ स्व॒धा पि॒तृभ्य॑÷ सु॒यमे॑ मे भूयास्तम्
य. 2.7

विश्वे॑ दे॒वास॑ इह मा॑दयन्ता॒मो३म्प्रति॑ष्ठ
य.2.13

अना॑धृष्टमस्यनाधृ॒ष्यं दे॒वाना॒मोजो
य. 5.5

उ॒ग्रं व॒चो॒ अपा॑वधीत्त्वे॒षं वचो॒ अपा॑व॒धीत्स्वाहा॑
य. 5.8

इन्द्र॑स्यस्यू॒रसीन्द्र॑स्यद्ं ध्रुवोसि
ऐ॒न्द्रम॑सिवैश्वदेव॒मसि
य. 5.30

दे॒वस्त्वा॑ स॒विता मध्वा॑नक्तु॑ सुपिप्प॒लाभ्य॒स्त्वौष॑धीभ्य॑ :
य 6.2

Page 248

मू॒र्धान॑मस्य सं॒सीव्याथ॑र्वा हृद॑यं च॒ यत्
म॒स्तिष्का॑दू॒र्ध्वः प्रैर॑य॒त् पव॑मानोऽधि॒ शीर्ष॒तः
अ. 10.2.26

Page 249

यो जा॒गार॒ तमृ॑चः कामयन्ते॒ यो जा॒गार॒ तमु॒ सामा॑नि यन्ति
यो जा॒गार॒ तम॒यं सोम॑ आह॒ तवा॒हम॑स्मि स॒ख्ये न्यो॑काः
ऋ. 5.44.14

Page 250

उप॑ ऋ॒तस्य॒ पथ्या॒ऽनु॑
य. 6.12

वसा॑ वसापावानः पिबतान्तरि॑क्षस्य ह॒विर॑सि॒ स्वाहा॑
य. 6.19

मनो॑ मे तर्पयत॒ वाच॑ मे तर्पयत
य. 6.31

स्वाङ्कृ॑तोऽसि॒ विश्वे॑भ्य इन्द्रि॒येभ्यो॑
य. 7.3

व॒यꣳ रा॒ष्ट्रे जा॑गृयाम पुरोहि॒ताः स्वाहा॑
य. 9.23

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

सꣳशितं मे ब्रह्म सꣳशितं वीर्यं बलम्
सꣳशितं क्षत्रं जिष्णु युस्याहमस्मि पुरोहितः
य. 11.81

स्वयं वाजिँस्तन्वं कल्पयस्व स्वयं यजस्व स्वयं जुषस्व
य. 23.15

उत् त्वा मन्दन्तु स्तोमाः कृणुष्व राधो अद्रिवः
अवं ब्रह्मद्विषो जहि
सा. 194

Page 251

उदु त्ये मधुमत्तमा गिरः स्तोमास ईरते
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव
सा. 251

२ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
आ त्वा सोमस्य गल्दया सदा याचन्नहं ज्या
१ २ ३ १ २र ३ १ २र २ २
भूर्णि मृगं न सवनेषु चुक्रुधं क ईशानं याचिषत्
सा. 207

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः
सुरभि नो मुखा करत् प्र ण आयूंषि तारिषत्
सा. 338

मा नो अरातिरीशत देवस्य मर्त्यस्य च
पर्षि तस्या उत द्विषः
ऋ. 2.7.2

सुप्राव्यः प्राशुषाळेष वीरः सुष्वेः पक्तिं कृणुते केवलेन्द्रः
नासुष्वेरापिर्न सखा न जामिर्दुष्प्राव्योऽवहन्तेदवाचः
ऋ. 4.25.6

अंहोयुवस्तन्वस्तन्वते वि वयो महद् दुष्टरं पूर्व्यायं
स संवतो नवजातस्तुतुर्यात् सिंहं न क्रुद्धमभितः परि ष्ठुः
ऋ. 5.15.3

Page 252

या आपो याश्च देवता या विराड् ब्रह्मणा सह
शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः
अ. 11.8.30

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

सूर्यचक्षुर्वातः प्राणं पुरुषस्य वि भेजिरे
अथास्येतरमात्मानं देवाः प्रायच्छन्नग्नये
अ. 11.8.31

तस्माद् वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते
सर्वा ह्यस्मिन् देवता गावो गोष्ठ इवासते
अ. 11.8.32

Page 254
अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्र तरता सखायः
अत्रा जहाम ये असन्नशेवाः शिवान् वयमुत्तरेमाभि वाजान्
ऋ. 10.53.8

अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः
तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम्
अ. 10.8.44

उत दैवा अवहितं देवा उन्नयथा पुनः
उतागश्चक्रुषं देवा देवा जीवयथा पुनः
ऋ. 10.137.1

अयुतोऽहमयुतो म आत्मायुतं मे चक्षुरयुतं मे श्रोत्रमयुतो मे प्राणोऽयुतो मेऽपानोऽयुतो मे व्यानोऽयुतोऽहं सर्वः
अ. 19.51.1

अनमित्रं नो अधरादनमित्रं न उत्तरात्
इन्द्रानमित्रं नः पश्चादनमित्रं पुरस्कृधि
अ. 6.40.3

Page 255
देवीरापो अग्रेगुवो अग्रेपुवोऽग्र इममद्य यज्ञं नयताग्रे
यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुवम्[3]
य. 1.12

इमां वाचमभि विश्वे गृणन्त आसद्यास्मिन् बर्हिषि
मादयध्वꣳ स्वाहा वाट्
य. 2.18

इयं ते यज्ञिया तनूरपो मुञ्चामि न प्रजाम
य. 4.13

लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम्
इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योनावसीषदन्
य. 12.54

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अया वंधस्व तन्वा गिरा ममा ऽऽ जाता सुक्रतो पृण

सा. 52

देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम्
उद् वा सिञ्चध्वमुप वा पृणध्वमादिद् वो देव ओहते

सा. 55

देवा यज्ञं नयन्तु नः

सा. 56

Page 256

वृणीध्वं हव्यवाहनम्

सा. 63

देवस्त्वा सविता मध्वानक्तु

य. 6.2

प्रति चक्ष्व वि चक्ष्वेन्द्रश्च सोम जागृतम्
रक्षोभ्यो वधमस्यतमशनिं यातुमद्भ्यः

ऋ. 7.104.25

प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते
इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपो ऽर्चन्ननु स्वराज्यम्

ऋ. 1.80.3

समानं वत्समभि संचरन्ती विष्वग्धेनू वि चरतः सुमेके
अनपवृज्याँ अध्वनो मिमाने विश्वान् केताँ अधि महो दधाने

ऋ. 1.146.3

सोमासो न ये सुतास्तृप्तांशवो हृत्सु पीतासो दुवसो नासते
ऐषामंसेषु रम्भिणीव रारभे हस्तेषु खादिश्च कृतिश्च सं दधे

ऋ. 1.168.3

Page 258

न रेवतां पणिना सख्यमिन्द्रो ऽसुन्वता सुतपाः सं गृणीते
आस्य वेदः खिदति हन्ति नग्नं वि सुष्वये पक्तये केवलो भूत

ऋ. 4.25.7

इदाह्नः पीतिमुत वो मदं धुर्न ऋते श्रान्तस्य सख्याय देवाः
ते नूनमस्मे ऋभवो वसूनि तृतीये अस्मिन् त्सवने दधात

ऋ. 4.33.11

यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रयाप्स्वा
महीमस्मभ्यमुरुषामुरु ज्रयो बृहत् सुवीरमनपच्युतं सहः

ऋ. 5.44.6

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यति ष्ठ
इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः कति जीवसे वः
ऋ. 10.18.6

यस्य ते विश्वा भुवनानि केतुना प्र चेरते नि च विशन्ते अक्तुभिः
अनागास्त्वेन हरिकेश सूर्याऽह्नाह्ना नो वस्यसावस्यसोदिहि
ऋ. 10.37.9

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु
उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ
ऋ. 10.103.13

Page 259

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्
आददेऽध्वरकृतं देवेभ्य इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः
ऋ. 10.113.16; अ. 19.51.2

शततेजा वायुरसि तिग्मतेजा द्विषतो वधः
य. 1.24

अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव
ऋ. 1.138.3

सिंहप्रतीको विशो अद्धि सर्वा व्याघ्रप्रतीकोऽव बाधस्व शत्रून्
एकवृष इन्द्रसखा जिगीवां छत्रूयतामा खिदा भोजनानि
अ. 4.22.7

वाक्पतिर्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण
य. 4.4

उदक्रमीद् द्रविणोदा वाज्यर्वाकः सुलोकꣳ सुकृतं पृथिव्याम्
ततः खनेम सुप्रतीकमग्निꣳ स्वो रुहाणा अधि नाकमुत्तमम्
य. 11.22

Page 260

इदमुच्छ्रेयोऽवसानमागां शिवे मे द्यावापृथिवी अभूताम्
असपत्नाः प्रदिशो मे भवन्तु न वै त्वा द्विष्मो अभयं नो अस्तु
अ. 19.14.1

Page 261

यस्तु सर्वाणि भूतान्यात्मन्नेवानु पश्यति
सर्वभूतेषु चात्मानन्ततो न विचिकित्सति
य. 40.6

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 262

द्यां मा लेखीरन्तरिक्षं मा हिंसीः पृथिव्या सम्भवं
य. 5.43

आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यति स्थ
तान् वस्त्वष्टा सुजनिमा संजोषाः सर्वमायुर्नयतु जीवनाय
अ. 12.2.24

अश्मन्वती रीयते सं रभध्वं वीरयध्वं प्र तरता सखायः
अत्रा जहीत ये असन् दुरेवा अनमीवानुत्तरेमाभि वाजान्
अ. 12.2.26

उत् तिष्ठता प्र तरता सखायोऽश्मन्वती नदी स्यन्दत इयम्
अत्रा जहीत ये असन्नशिवाः शिवान्स्योनानुत्तरेमाभि वाजान्
अ. 12.2.27

Page 263

आयुषायुःकृतां जीवायुष्मान् जीव मा मृथाः
प्राणेनात्मन्वतां जीव मा मृत्योरुदगा वशम्
अ. 19.27.3

गिरा वज्रो न संभृतः सबलो अनपच्युतः ववक्ष ऋष्वो अस्तृतः
अ. 20.47.3

य उग्रः सन्ननिष्टृत स्थिरो रणाय संस्कृतः
यदिं स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत्
अ. 20.53.3

परमेण धाम्ना दृंहाहस्व मा ह्वार्मा तें यज्ञपतिर्ह्वार्षीत्
य. 1.2

दैव्यायं कर्मणे शुन्धध्वं
य. 1.13

अत्र पितरो मादयध्वं
य. 2.31

तेनं परो मूजवतोऽतीहि
य. 3.61

श्येनोभूत्वापरापतयजमानस्य गृहात् गच्छतन्नौ सँस्कृतम्
य. 4.34

Page 265

उरुं नो लोकमनु नेपि विद्वान्त्स्वर्यज्योतिरभयं स्वस्ति
उग्रा तं इन्द्र स्थविरस्य बाहू उपं क्षयेम शरणा बृहन्ता
अ. 19.15.4

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 266

समुद्रं गच्छ स्वाहा ऽन्तरिक्षं गच्छ स्वाहा
य. 6.21

मा भेर्मा सं विक्था ऊर्जं धत्स्व धिषणे
य. 6.35

प्रागपागुदगधराक्सर्वतस्त्वा दिश आ धावन्तु
य. 6.36

प्रतूर्वन्नेह्यवक्रामन्नशस्ती
य. 11.15

उत्क्राम महते सौभगायास्मादास्थानाद्
य. 11.21

स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन्
य. 11.44

मयि गृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय
य. 13.1

प्र मृणीहि शत्रून्
य. 13.13

Page 267

सुपर्णोऽसि गरुत्मान् पृष्ठे पृथिव्याः सीद
भासाऽन्तरिक्षमा पृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद्दृꣳहं
य. 17.72

अदर्शि गातुवित्तमो यस्मिन् व्रतान्यादधुः। पदीष्ट तृष्णया सह
सा. 47

प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते
इन्द्रं नृम्णं हि ते शवो हनो वृत्रं जया अपो ऽर्चन्ननु स्वराज्यम्
सा. 413

मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत्
ऋ. 1.38.6

मा वो घ्नन्तं मा शपन्तं प्रति वोचे देवयन्तम्
सुम्नैरिद् व आ विवासे
ऋ. 1.41.8

Page 268

त्वं नो गोपाः पथिकृद् विचक्षणस्तव व्रताय मतिभिर्जरामहे
बृहस्पते यो नो अभि ह्वरो दधे स्वा तं मर्मर्तु दुच्छुना हरस्वती
ऋ. 2.3.6

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

उत वा यो नो मर्चयादनांगसो ऽरातीवा मर्तः सानुको वृकः
बृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देवतीतये कृधि
ऋ. 2.3.7

अव क्षिप दिवो अश्मानमुच्चा येन शत्रुं मन्दसानो निजूर्वाः
तोकस्य सातौ तनयस्य भूरेरस्माँ अर्धं कृणुतादिन्द्र गोनाम्
ऋ. 2.30.5

उद्यत् सहः सहस आजनिष्ट देदिष्ट इन्द्रं इन्द्रियाणि विश्वा
प्राचोदयत् सुदुघा वव्रे अन्तर्वि ज्योतिषा संववृत्वत् तमोऽवः
ऋ. 5.31.3

अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान् निधयेव बद्धान्
सा. 319

रिशादसः सत्पतीँरदब्धान् महो राज्ञः सुवसनस्य दातॄन्
यूनः सुक्षत्रान् क्षयतो दिवो नृनादित्यान् याम्यदितिं दुवोयु
ऋ. 6.51.4

न तद् दिवा न पृथिव्यानु मन्ये न यज्ञेन नोत शमीभिराभिः
उब्जन्तु तं सुभ्वः पर्वतासो नि हीयतामतियाजस्य यष्टा
ऋ. 6.52.1

मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः। मान्तः स्थुर्नो अरातयः
ऋ. 10.57.1

Page 269

अध्वर्यो द्रावया त्वं सोममिन्द्रः पिपासति
सा. 308

अकर्मा दस्युरभि नो अमन्तुरन्यव्रतो अमानुषः
त्वं तस्यामित्रहन् वधर्दासस्य दम्भय
ऋ. 10.22.8

यो नो दिप्सददिप्सतो दिप्सतो यश्च दिप्सति
वैश्वानरस्य दंष्ट्रयोरग्नेरपि दधामि तम्
अ. 4.36.2

अव ज्यामिव धन्वनो मन्युं तनोमि ते हृदः
यथा संमनसौ भूत्वा सखायाविव सचावहै
अ. 6.42.1

उद्यन्त्सूर्य इव सुप्तानां द्विषतां वर्च आ ददे
अ. 7.13.2

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मा गतानामा दीधीथा ये नयन्ति परावतम्
आ रोह तमसो ज्योतिरेह्या ते हस्तौ रभामहे
अ. 8.1.8

Page 271

परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च
उपस्थाय प्रथमजामृतस्यात्मनाऽऽत्मानमभि सं विवेश
य. 32.11

Page 272

येऽश्रद्धा धनकाम्या क्रव्यादां समासते
ते वा अन्येषां कुम्भीं पर्वादधति सर्वदा
अ. 12.2.51

शर्मास्यवधूतꣳ रक्षोऽवधूता अरातयो
य. 1.19

परि माऽग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज
य. 4.28

रक्षसां भागोऽसि निरस्त ँ रक्षः
य. 6.16

सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम
दिवं पृथिव्या अध्याऽरुहामाविदाम देवान्त्स्वर्ज्योतिः'
य. 8.52

अग्ने रक्षा णो अंहसः प्रति ष्म देव रीषतः। तपिष्ठैरजरो दह
सा. 24

बोधिन्मना इदस्तु नो वृत्रहा भूर्यासुतिः। शृणोतु शक्र आशिषम्
सा. 140

वि द्विषा वि मृधो जहि
सा. 274

Page 273

सा नो भूमे प्र रोचय हिरण्यस्येव संदृशि मा नो द्विक्षत कश्चन
अ. 12.1.18

Page 275

तच्चक्षुर्देवहितं शुक्रमुच्चरत
पश्येम शरदः शतं जीवेम शरदः शतम्
ऋ. 7.66.16

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 276

सनेमि चक्रमजर् वि वावृत उत्तानायां दश युक्ता वहन्ति
सूर्यस्य चक्षू रजसैत्यावृतं यस्मिन्नातस्थुर्भुवनानि विश्वा
अ. 9.9.14

काले मनः काले भूतानि प्राणः काले नाम समाहितम्
कालेन सर्वा नन्दन्त्यागतेन प्रजा इमाः
अ. 19.53.7

काले तपः काले ज्येष्ठं काले ब्रह्म समाहितम्
कालो ह सर्वस्येश्वरो यः पितासीत् प्रजापतेः
अ. 19.53.8

Page 277

यो भूतं च भव्यं च सर्वं यश्चाधितिष्ठति
स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः
अ. 10.8.1

Page 278

यो विश्वचर्षणिरुत विश्वतोमुखो यो विश्वतस्पाणिरुत विश्वतस्पृथः
सं बाहुभ्यां भरति सं पतत्रैर्द्यावापृथिवी जनयन् देव एकः
अ. 13.2.26

ऋतं च सत्यं चाभीद्धात् तपसोऽध्यजायत
ततो रात्र्यजायत ततः समुद्रो अर्णवः
ऋ. 10.190.1

Page 279

समुद्रादर्णवादधि संवत्सरो अजायत
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी
ऋ. 10.190.2

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्
दिवं च पृथिवीं चाऽन्तरिक्षमथो स्वः
ऋ. 10.190.3

Page 281

पूर्णः कुम्भोऽधि काल आहितस्तं वै पश्यामो बहुधा नु सन्तः
स इमा विश्वा भुवनानि प्रत्यङ्कालं तमाहुः परमे व्योमन्
अ. 19.53.3

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 283

द्यौरासीत्पूर्वचित्तिरश्वं आसीद् बृहद्वयः
अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला
य. 23.12

Page 284

मिमातु द्यौरदितिर्वीतये नः सं दानुचित्रा उषसो यतन्ताम्
आचुच्यवुर्दिव्य कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः
ऋ. 5.59.8

द्युतद्यामानं बृहतीमृतेन ऋतावरीमरुणप्सुं विभातीम्
देवीमुषसं स्वरावहन्तीं प्रति विप्रासो मतिभिर्जरन्ते
ऋ. 5.80.1

एषा जनं दर्शता बोधयन्ती सुगान् पथः कृण्वती यात्यग्रे
बृहद्रथा बृहती विश्वमिन्वोषा ज्योतिर्यच्छत्यग्रे अह्नाम्
ऋ. 5.80.2

एषा गोभिररुणेभिर्युजाना ऽस्रेधन्ती रयिमप्रायु चक्रे
पथो रदन्ती सुविताय देवी पुरुष्टुता विश्ववारा वि भाति
ऋ. 5.80.3

Page 285

प्रत्यु अदर्श्यायत्युच्छन्ती दुहिता दिवः
अपो महि व्ययति चक्षसे तमो ज्योतिष्कृणोति सूनरी
सा. 303

Page 286

एषा व्यैनी भवति द्विबर्हा आविष्कृण्वाना तन्वं पुरस्तात्
ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति
ऋ. 5.80.4

एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्थात्
अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात्
ऋ. 5.80.5

एषा प्रतीची दुहिता दिवो नॄन् योषेव भद्रा नि रिणीते अप्सः
व्यूर्णवती दाशुषे वार्याणि पुनर्ज्योतिर्युवतिः पूर्वथाकः
ऋ. 5.80.6

क्वा त्या वल्गू पुरुहूताद्य दूतो न स्तोमोऽविदन्नमस्वान्
आ यो अर्वाङ्नासत्या ववर्त प्रेष्ठा ह्यसथो अस्य मन्मन्
ऋ. 6.63.1

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

उत् ते वयश्चिद् वसतेरपप्तन नरश्च ये पितुभाजो व्युष्टौ
अमा सुते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय
ऋ. 6.64.6

Page 287

एषा स्या नो दुहिता दिवोजाः क्षितीरुच्छन्ती मानुषीरजीगः
या भानुना रुशता राम्यास्वञ्जायि तिरस्तमसश्चिदक्तून्
ऋ. 6.65.1

समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आ वहन्तु
ऋ. 7.41.6

अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः
घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः
ऋ. 7.41.7

प्र मे पन्था देवयानाो अदृश्रन्नमर्धन्तो वसुभिरिष्कृतासः
अभूदु केतुरुषसः पुरस्तात् प्रतीच्यागादधि हर्म्येभ्यः
ऋ. 7.76.2

Page 288

मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः। मधु द्यौरस्तु नः पिता
ऋ. 1.90.7

Page 289

ग्रावाणेव तदिदर्थं जरेथे गृध्रेव वृक्षं निधिमन्तमच्छ
ब्रह्माणेव विदथ उक्थशासा दूतेव हव्या जन्या पुरुत्रा
ऋ. 2.39.1

प्रातर्यावाणा रथ्येव वीरा ऽजेव युमा वरमा संचेथे
मेने इव तन्वाऽ शुम्भमाने दंपतीव क्रतुविदा जनेषु
ऋ. 2.39.2

शृङ्गेव नः प्रथमा गन्तमर्वाक् छफाविव जर्भुराणा तरोभिः
चक्रवाकेव प्रति वस्तोरुस्रा ऽर्वाञ्चा यातं रथ्येव शक्रा
ऋ. 2.39.3

वातेवाजुर्या नद्येव रीतिरक्षी इव चक्षुषा यातमर्वाक्
हस्ताविव तन्वेऽ शंभविष्ठा पादेव नो नयतं वस्यो अच्छ
ऋ. 2.39.5

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 290

ओष्ठाविव मध्वास्ने वदन्ता स्तनाविव पिप्यतं जीवसे नः
नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे
ऋ. 2.39.6

हस्तेव शक्तिमभि संददी नः क्षामेव नः समंजतं रजांसि
इमा गिरो अश्विना युष्मयन्तीः क्ष्णोत्रेणेव स्वधितिं सं शिशीतम्
ऋ. 2.39.7

एतानि वामश्विना वर्धनानि ब्रह्म स्तोमं गृत्समदासो अक्रन्
तानि नरा जुजुषाणोप यातं बृहद् वदेम विदथे सुवीराः
ऋ. 2.39.8

नावेव नः पारयतं युगेव नभ्येव न उपधीव प्रधीव
श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान्
ऋ. 2.39.4

Page 292

अपो देवीरुप ह्वये यत्र गावः पिबन्ति नः। सिन्धुभ्यः कर्त्वं हविः
ऋ. 1.23.18

प्रान्यच्चक्रमवृहः सूर्यस्य कुत्सायान्यद् वरिवो यातवेऽकः
अनासो दस्यूँरमृणो वधेन नि दुर्योण आवृणङ् मृध्रवाचः
ऋ. 5.29.10

आ सूर्यो अरुहच्छुक्रमर्णो ऽयुक्त यद्धरितो वीतपृष्ठाः
उद्वा न नावमनयन्त धीरा आशृण्वतीरापो अर्वागतिष्ठन्
ऋ. 5.45.10

Page 293

अयं रोचयदुरुचो रुचानोऽ ऽयं वासयद् व्यृतेन पूर्वीः
अयमीयत ऋतयुग्भिरश्वैः स्वर्विदा नाभिना चर्षणिप्राः
ऋ. 6.39.4

वेद यस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः
ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो अर्य एवान्
ऋ. 6.51.2

इन्द्रो नेदिष्ठमवसागमिष्ठः सरस्वती सिन्धुभिः पिन्वमाना
पर्जन्यो न ओषधीभिर्मयोभुरग्निः सुशंसः सुहवः पितेव
ऋ 6.52.6

उदू अयाँ उपवक्तेव बाहू हिरण्ययां सविता सुप्रतीका
दिवो रोहांस्यरुहत्पृथिव्या अरीरभत्पतयत्कच्चिदभ्वम्
ऋ 6.71.5

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

उदु ष्य देवः सविता यंयाम हिरण्ययीममतिं यामशिश्रेत
नूनं भगो हव्यो मानुषेभिर्वि यो रत्ना पुरूवसुर्दधाति

ऋ. 7.38.1

Page 294

आ देवो यातु सविता सुरत्नो ऽन्तरिक्षप्रा वहमानो अश्वैः
हस्ते दधानो नर्या पुरूणि निवेशयन्च प्रसुवन्च भूम

ऋ. 7.45.1

उदस्य बाहू शिथिरा बृहन्ता हिरण्ययो दिवो अन्ताँ अनष्टाम्
नूनं सो अस्य महिमा पनिष्ट सूरश्चिदस्मा अनु दादपस्याम्

ऋ. 7.45.2

स घा नो देवः सविता सहावा ऽऽ साविषद् वसुपतिर्वसूनि
विश्रयमाणो अमतिमुरूचीं मर्तभोजनमध रासते नः

ऋ. 7.45.3

बहवः सूरचक्षसो ऽग्निजिह्वा ऋतावृधः
त्रीणि ये येमुर्विदथानि धीतिभिर्विश्वानि परिभूतिभिः

ऋ. 7.66.10

Page 295

उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत
कृत्वा देवानामजनिष्ट चक्षुराविरकर्भुवनं विश्वमुषाः

ऋ. 7.76.1

तवेदिन्द्राहमाशसा हस्ते दात्रं चना ददे
दिनस्य वा मघवन् त्संभृतस्य वा पूर्धि यवस्य काशिना

ऋ. 8.78.10

रोहितो दिवमारुहत् तपसा तपस्वी
स योनिमैति स उ जायते पुनः स देवानामधिपतिर्बभूव

अ. 13.2.25

अग्निर्मा गोप्ता परि पातु विश्वत उद्यन्त्सूर्यो नुदतां मृत्युपाशान्
व्युच्छन्तीरुषसः पर्वता ध्रुवाः सहस्रं प्राणा मय्या यतन्ताम्

अ. 17.1.30

अपामीवामप स्रिधमप सेधत दुर्मतिम्
आदित्यासो युयोतना नो अंहसः

सा. 397

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 297

वयश्चित् ते पतत्रिणो द्विपच्चतुष्पदर्जुनि
उषः प्रारन्नृतूँरनु दिवो अन्तेभ्यस्परि

ऋ. 1.49.3

Page 298

मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि

ऋ. 2.33.4

हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै

ऋ. 2.33.5

रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः। विश्वा अधि श्रियोऽधित

ऋ. 10.127.1

Page 300

तं घेमित्था नमस्विन उप स्वराजमासते
होत्राभिरग्निं मनुषः समिन्धते तितिर्वांसो अति स्रिधः

ऋ. 1.36.7

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः

ऋ. 1.90.6

मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः। मधु द्यौरस्तु नः पिता

ऋ. 1.90.7

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः

ऋ. 1.90.8

यथा चिन्मन्यसे हृदा तन्दिमे जग्मुराशसः
ये ते नेदिष्ठं हवनान्यागमन् तान् वर्ध भीमसंदृशः

ऋ. 5.56.2

एतं मे स्तोममूर्म्ये दाभ्याय परा वह। गिरो देवि रथीरिव

ऋ. 5.61.17

आ यः पप्रौ भानुना रोदसी उभे धूमेन धावते दिवि
तिरस्तमो ददृश ऊर्म्यास्वा श्यावास्वरुषो वृषा श्यावा अरुषो वृषा

ऋ. 6.48.6

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 301

पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतमप्यानि
सत्यश्रुतः कवयो यस्य गीर्भिर्जगतः स्थातर्जगदा कृणुध्वम्
ऋ. 6.49.6

आ नो रुद्रस्य सूनवो नमन्तामद्या हुतासो वसवोऽधृष्टाः
यदीमर्भे महति वा हितासो बाधे मरुतो अह्नाम देवान्
ऋ. 6.50.4

अनेनो वो मरुतो यामो अस्त्वनश्वश्चिद यमजत्यरथीः
अनवसो अनभीशू रजस्तूर्वि रोदसी पथ्या याति साधन्
ऋ. 6.66.7

Page 302

उत त्ये नो गरुतो मन्दसाना धियं तोकं च वाजिनोऽवन्तु
मा नः परि ख्यदक्षरा चरन्त्यवीवृधन् युज्यं ते रयिं नः
ऋ. 7.36.7

अंसेष्वा मरुतः खादयो वो वक्षःसु रुक्मा उपशिश्रियाणाः
वि विद्युतो न वृष्टिभी रुचाना अनु स्वधामायुधैर्यच्छमानाः
ऋ. 7.56.13

इमे तुरं मरुतो रामयन्तीमे सहः सहस आ नमन्ति
इमे शंसं वनुष्यतो नि पान्ति गुरु द्वेषो अररुषे दधन्ति
ऋ. 7.56.19

Page 303

यो गर्भमोषधीनां गवां कृणोत्यर्वताम्। पर्जन्यः पुरुषीणाम्
ऋ. 7.102.2

वृषणश्वेन मरुतो वृषप्सुना रथेन वृषनाभिना
आ श्येनासो न पक्षिणो वृथा नरो हव्या नो वीतये गत
ऋ. 8.20.10

Page 304

हुवे वातस्वनं कविं पर्जन्यक्रन्द्यं सहः
अग्निं समुद्रवाससम्
ऋ. 8.102.5

Page 305

विप्रासो न मन्मभिः स्वाध्यो देवाव्योर्न यज्ञैः स्वप्नसः
राजानो न चित्राः सुसंदृशः क्षितीनां न मर्या अरेपसः
ऋ. 10.78.1

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अग्निनं ये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः सद्यऊतयः
प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुशर्माणो न सोमा ऋतं यते

ऋ. 10.78.2

वातासो न ये धुनयो जिगत्नवोऽग्नीनां न जिह्वा विरोकिणः
वर्मण्वन्तो न योधाः शिमीवन्तः पितॄणां न शंसाः सुरातयः

ऋ. 10.78.3

रथानां न येरवः सनाभयो जिगीवांसो न शूरा अभिद्यवः
वरेयवो न मर्या घृतप्रुषोऽभिस्वर्तारो अर्का न सुष्टुभः

ऋ. 10.78.4

अश्वासो न ये ज्येष्ठास आशवो दिधिषवो न रथ्यः सुदानवः
आपो न निम्नैरुदभिर्जिगत्नवो विश्वरूपा अङ्गिरसो न साम्भिः

ऋ. 10.78.5

ग्रावाणो न सूरयः सिन्धुमातर आदर्दिरासो अद्रयो न विश्वहा
शिशूला न क्रीळयः सुमातरो महाग्रामो न यामन्रुत त्विषा

ऋ. 10.78.6

Page 306

उषसां न केतवोऽध्वरश्रियः शुभंयवो नाञ्जिभिर्व्यश्वितन्
सिन्धवो न यवियो भ्राजदृष्टयः परावतो न योजनानि ममिरे

ऋ. 10.78.7

सुभागात्रो देवाः कृणुता सुरत्नानस्मान् स्तोतॄन् मरुतो वावृधानाः
अधि स्तोत्रस्य सख्यस्य गात सनाद्धि वो रत्नधेयानि सन्ति

ऋ. 10.78.8

यददो वात ते गृहेऽमृतस्य निधिर्हितः। ततो नो देहि जीवसे

ऋ. 10.186.3

Page 307

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु

अ. 12.1.1

असंबाधं बध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः

अ. 12.1.2

यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः
यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः पूर्वपेये दधातु

अ. 12.1.3

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः
या बिभर्ति बहुधा प्राणदेजद् सा नो भूमिर्गोष्वप्यन्ने दधातु

अ. 12.1.4

Page 308

यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्तयन्
गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु

अ. 12.1.5

विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी
वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु

अ. 12.1.6

यां रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथिवीमप्रमादम्
सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा

अ. 12.1.7

यार्णवेऽधि सलिलमग्र आसीद् यां मायाभिरन्वचरन् मनीषिणः
यस्या हृदयं परमे व्योमन्त्सत्येनावृतममृतं पृथिव्याः
सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे

अ. 12.1.8

यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति
सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा

अ. 12.1.9

Page 310

गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवि स्योनमस्तु
बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम्
अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम्

अ. 12.1.11

यत् ते मध्यं पृथिवि यच्च नभ्यं यास्त ऊर्जस्तन्वः संबभूवुः
तासु नो धेह्यभि नः पवस्व माता भूमिः पुत्रो अहं पृथिव्याः
पर्जन्यः पिता स उ नः पिपर्तु

अ. 12.1.12

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यज्ञं तन्वते विश्वकर्माणः
यस्यां मीयन्ते स्वरवः पृथिव्यामूर्ध्वाः शुक्रा आहुत्याः पुरस्तात्
सा नो भूमिर्वर्धयद् वर्धमाना

अ. 12.1.13

यो नो द्वेषत् पृथिवि यः पृतन्याद् योऽभिदासान्मनसा यो वधेन
तं नो भूमे रन्धय पूर्वकृत्वरि

अ. 12.1.14

त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः
तवेमे पृथिवि पञ्च मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य
उद्यन्त्सूर्यो रश्मिभिरातनोति

अ. 12.1.15

Page 311

ता नः प्रजाः सं दुहतां समग्रा वाचो मधु पृथिवि धेहि मह्यम्

अ. 12.1.16

विश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम्
शिवां स्योनामनु चरेम विश्वहा

अ. 12.1.17

महत् सधस्थं महती बभूविथ महान् वेग एजथुर्वेपथुष्टे
महांस्त्वेन्द्रो रक्षत्यप्रमादम्
सा नो भूमे प्र रोचय हिरण्यस्येव संदृशि मा नो द्विक्षत कश्चन

अ. 12.1.18

अग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु
अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः

अ. 12.1.19

अग्निर्दिव आ तपत्यग्नेर्देवस्योर्वन्तरिक्षम्
अग्निं मर्तास इन्धते हव्यवाहं घृतप्रियम्

अ. 12.1.20

अग्निवासाः पृथिव्यसितजूस्त्विषीमन्तं संशितं मा कृणोतु

अ. 12.1.21

Page 313

यस्यां वृक्षा वानस्पत्या ध्रुवास्तिष्ठन्ति विश्वहा
पृथिवीं विश्वधायसं धृतामच्छावदामसि

अ. 12.1.27

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 314

सा नो भूमिः प्राणमायुर्दधातु जरदष्टिं मा पृथिवी कृणोतु

अ. 12.1.22

यस्ते गन्धः पृथिवि संबभूव यं बिभ्रत्योषधयो यमापः
यं गन्धर्वा अप्सरसश्च भेजिरे तेन मा सुरभिं कृणु मा नो द्विक्षत कश्चन

अ. 12.1.23

यस्ते गन्धः पुष्करमाविवेश यं संजभ्रुः सूर्यायां विवाहे
अमर्त्याः पृथिवि गन्धमग्रे तेन मा सुरभिं कृणु मा नो द्विक्षत कश्चन

अ. 12.1.24

यस्ते गन्धः पुरुषेषु स्त्रीषु पुंसु भगो रुचिः। यो अश्वेषु वीरेषु यो मृगेषूत हस्तिषु
कन्याऽयां वर्चो यद् भूमे तेनास्माँ अपि सं सृज मा नो द्विक्षत कश्चन

अ. 12.1.25

शिला भूमिरश्मा पांसुः सा भूमिः संधृता धृता
तस्यै हिरण्यवक्षसे पृथिव्या अकरं नमः

अ. 12.1.26

Page 315

उदीराणा उतासीनास्तिष्ठन्तः प्रकामन्तः
पद्भ्यां दक्षिणसव्याभ्यां मा व्यथिष्महि भूम्याम्

अ. 12.1.28

विमृग्वरीं पृथिवीमा वदामि क्षमां भूमिं ब्रह्मणा वावृधानाम्
ऊर्जं पुष्टं बिभ्रतीमन्नभागं घृतं त्वामि नि षीदेम भूमे

अ. 12.1.29

शुद्धा न आपस्तन्वेऽक्षरन्तु यो नः सेदुरप्रिये तं नि दध्मः
पवित्रेण पृथिवि मोत् पुनामि

अ. 12.1.30

यास्ते प्राचीः प्रदिशो या उदीचीर्यास्ते भूमे अधराद् याश्च पश्चात्
स्योनास्ता मह्यं चरते भवन्तु मा नि पप्तं भुवने शिश्रियाणः

अ. 12.1.31

यावत् तेऽभि विपश्यामि भूमे सूर्येण मेदिनां
तावन्मे चक्षुर्मा मेष्टोत्तरामुत्तरां समाम्

अ. 12.1.33

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

यत् ते भूमे विखनामि क्षिप्रं तदपि रोहतु
मा ते मर्म विमृग्वरि मा ते हृदयमर्पिषम्

अ. 12.1.35

Page 316

ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमन्तः शिशिरो वसन्तः
ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवि नो दुह्यताम्

अ. 12.1.36

यस्यां सदोहविर्धाने यूपो यस्यां निमीयते
ब्रह्माणो यस्यामर्चन्त्यृग्भिः साम्ना यजुर्विदः
युज्यन्ते यस्यामृत्विजः सोममिन्द्राय पातवे

अ. 12.1.38

यस्यां पूर्वे भूतकृत ऋषयो गा उदानृचुः
सप्त सत्रेण वेधसो यज्ञेन तपसा सह

अ. 12.1.39

सा नो भूमिरा दिशतु यद्धनं कामयामहे
भगो अनुप्रयुङ्क्तामिन्द्र एतु पुरोगवः

अ. 12.1.40

यस्यां गायन्ति नृत्यन्ति भूम्यां मर्त्या व्यैलबाः
युध्यन्ते यस्यामाक्रन्दो यस्यां वदति दुन्दुभिः
सा नो भूमिः प्र णुदतां सपत्नानसपत्नं मा पृथिवी कृणोतु

अ. 12.1.41

Page 317

भूमे मातर्नि धेहि मा भद्रया सुप्रतिष्ठितम्
संविदाना दिवा कवे श्रियां मा धेहि भूत्याम्

अ. 12.1.63

Page 318

यस्यामन्नं व्रीहियवौ यस्या इमाः पञ्च कृष्टयः
भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षमेदसे

अ. 12.1.42

निधिं बिभ्रती बहुधा गुहा वसु मणिं हिरण्यं पृथिवी ददातु मे
वसूनि नो वसुदा रासमाना देवी दधातु सुमनस्यमाना

अ. 12.1.44

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ये त आरण्याः पशवो मृगा वने हिताः सिंहा व्याघ्राः पुरुषादश्चरन्ति
उलं वृकं पृथिवि दुच्छुनामित ऋक्षीकां रक्षो अप बाधयास्मत्

अ. 12.1.49

यां द्विपादः पक्षिणः संपतन्ति हंसाः सुपर्णा शकुना वयांसि
यस्यां वातो मातरिश्वेयते रजांसि कृण्वंश्च्यावयंश्च वृक्षान्
वातस्य प्रवामुपवामनु वात्यर्चिः

अ. 12.1.51

यस्यां कृष्णमरुणं च संहिते अहोरात्रे विहिते भूम्यामधि
वर्षेण भूमिः पृथिवी वृतावृता सा नो दधातु भद्रया प्रिये धामनिधामनि

अ. 12.1.52

द्यौश्च म इदं पृथिवी चान्तरिक्षं च मे व्यचः
अग्निः सूर्य आपो मेधां विश्वे देवाश्च सं ददुः

अ. 12.1.53

Page 319

अहमस्मि सहमान उत्तरो नाम भूम्याम्
अभीषाडस्मि विश्वाषाडाशामाशां विषासहिः

अ. 12.1.54

ये ग्रामा यदरण्यं याः सभाअधि भूम्याम्
ये संग्रामाः समितयस्तेषु चारु वदेम ते

अ. 12.1.56

अश्व इव रजो दुधुवे वि तान् जनान् य आक्षियन् पृथिवीं यादजायत
मन्द्राग्रेत्वरी भुवनस्य गोपा वनस्पतीनां गृभिरोषधीनाम्

अ. 12.1.57

यद् वदामि मधुमत् तद् वदामि यदीक्षे तद् वनन्ति मा
त्विषीमानस्मि जूतिमानवान्यान् हन्मि दोधतः

अ. 12.1.58

शन्तिवा सुरभिः स्योना कीलालोध्नी पयस्वती
भूमिरधि ब्रवीतु मे पृथिवी पयसा सह

अ. 12.1.59

उपस्थास्ते अनमीवा अयक्ष्मा अस्मभ्यं सन्तु पृथिवि प्रसूताः
दीर्घं न आयुः प्रतिबुध्यमाना वयं तुभ्यं बलिहृतः स्याम

अ. 12.1.62

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

उभा देवा दिविस्पृशेन्द्रवायू हवामहे
अस्य सोमस्य पीतये

ऋ. 1.23.2

अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तये। देवा भवत वाजिनः

ऋ. 1.23.19

इदमापः प्र वहत यत् किं च दुरितं मयि
यद् वाहमभिदुद्रोह यद् वा शेप उतानृतम्

ऋ. 1.23.22

समन्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति
तमू शुचिं शुचयो दीदिवांसमपां नपातं परि तस्थुरापः

ऋ. 2.35.3

प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने
गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते

ऋ. 3.33.1

इन्द्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः
समाराणे ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे

ऋ. 3.33.2

अच्छा सिन्धुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म
वत्समिव मातरा संरिहाणे समानं योनिमनु संचरन्ती

ऋ. 3.33.3

एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरन्तीः
न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति

ऋ. 3.33.4

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः
प्र सिन्धुमच्छा बृहती मनीषा ऽवस्युरह्वे कुशिकस्य सूनुः

ऋ. 3.33.5

इन्द्रो अस्माँ अरदद् वज्रबाहुरपाहन् वृत्रं परिधिं नदीनाम्
देवोऽनयत् सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः

ऋ. 3.33.6

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 324

प्रवाच्यं शश्वधा वीर्यं१ तदिन्द्रस्य कर्म यदहिं विवृश्चत्
वि वज्रेण परिषदो जघानाऽऽयन्नापोऽयनमिच्छमानाः

ऋ. 3.33.7

एतद् वचो जरितर्मापि मृष्ठा आ यत् ते घोषानुत्तरा युगानि
उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते

ऋ. 3.33.8

ओ षु स्वसारः कारवे शृणोत ययौ वो दूरादनसा रथेन
नि षू नमध्वं भवता सुपारा अधोअक्षाः सिन्धवः स्रोत्याभिः

ऋ. 3.33.9

आ ते कारो शृणवाम वचांसि ययाथ दूरादनसा रथेन
नि ते नसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते

ऋ. 3.33.10

उद् वं ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत
मादुष्कृतौ व्येनसा ऽघ्न्यौ शूनमारताम्

ऋ. 3.33.13

Page 326

शतपवित्राः स्वधया मदन्तीर्देवीर्देवानामपि यन्ति पाथः
ता इन्द्रस्य न मिनन्ति व्रतानि सिन्धुभ्यो हव्यं घृतवज्जुहोत

ऋ. 7.47.3

उपह्वरे गिरीणां सगथे च नदीनाम्। धिया विप्रो अजायत

ऋ. 8.6.28

इन्द्राय पवते मदः सोमो मरुत्वते सुतः
सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः

ऋ. 9.107.17

Page 327

प्र तेऽरदद्वरुणो यातवे पथः सिन्धो यद्वाजाँ अभ्यद्रवस्त्वम्
भूम्या अधि प्रवता यासि सानुना यदेषामग्रं जगतामिरज्यसि

ऋ. 10.75.2

दिवि स्वनो यतते भूम्योपर्यनन्तं शुष्ममुदियर्ति भानुना
अभ्रादिव प्र स्तनयन्ति वृष्टयः सिन्धुर्यदेति वृषभो न रोरुवत्

ऋ. 10.75.3

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अभि त्वा सिन्धो शिशुमिन्न मातरो वाश्रा अर्षन्ति पयसेव धेनवः
राजेवयुध्वा नयसि त्वमित् सिचौ यदासामग्रं प्रवतामिनक्षसि

ऋ. 10.75.4

ऋजीत्येनी रुशती महित्वा परि ज्रयांसि भरते रजांसि
अदब्धा सिन्धुरपसामपस्तमा ऽश्वा न चित्रा वपुषीव दर्शता

ऋ. 10.75.7

Page 329

सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वः पत

य. 12.4

Page 330

क्षेत्रस्य पतिना वयं हितेनेव जयामसि
गामश्वं पोषयित्वा स नो मृळातीदृशे

ऋ. 4.57.1

क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व
मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयन्तु

ऋ. 4.57.2

Page 331

मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम्
क्षेत्रस्य पतिर्मधुमान् नो अस्त्वरिष्यन्तो अन्वेनं चरेम

ऋ. 4.57.3

शुनं वाहाः शुनं नरः शुनं कृषतु लाङ्गलम्
शुनं वरत्रा बध्यन्तां शुनमष्ट्रामुदिङ्गय

ऋ. 4.57.4

शुनासीराविमां वाचं जुषेथां यद् दिवि चक्रथुः पयः
तेनेमामुप सिञ्चतम्

ऋ. 7.57.5

Page 332

अर्वाचीं सुभगे भव सीते वन्दामहे त्वा
यथा नः सुभगाससि यथा नः सुफलाससि

ऋ. 4.57.6

इन्द्रः सीतां नि गृह्णातु तां पूषानु यच्छतु
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम्

ऋ. 4.57.7

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

शुनं नः फाला वि कृषन्तु भूमिं शुनं कीनाशा अभि यन्तु वाहैः
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम्

ऋ. 4.57.8

सोमं रारन्धि नो हृदि गावो न यवसेष्वा। मर्य इव स्व ओक्ये

ऋ. 1.91.13

Page 334

पयस्वतीरोषधयः पयस्वन्मामकं वचः
अथो पयस्वतीनामा भरेऽहं सहस्रशः

अ. 3.24.1

वेदाहं पयस्वन्तं चकारं धान्यं बहु
संभृत्वा नाम यो देवस्तं वयं हवामहे यो यो अपज्वनो गृहे

अ. 3.42.2

Page 335

इमा याः पञ्च प्रदिशो मानवीः पञ्च कृष्टयः
वृष्टे शापं नदीरिवेहि स्फातिं समावहान्

अ. 3.24.3

उदुत्सुं शतऽधारं सहस्रधारमक्षितम्
एवास्माकेदं धान्यं सहस्रधारमक्षितम्

अ. 3.24.4

Page 336

शतहस्त समाहरसहस्रहस्त सं किर
कृतस्य कार्यस्य चेह स्फातिं समावह

अ. 3.24.5

तिस्रो मात्रा गन्धर्वाणां चतस्रो गृहपत्न्याः
तासां या स्फातिमत्तमा तया त्वाभिमृशामसि

अ. 3.24.6

Page 338

आ गावो अग्मन्नुत भद्रमक्रन् त्सीदन्तु गोष्ठे रणयन्त्वस्मे
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः

ऋ. 6.28.1

इन्द्रो यज्वने पृणते च शिक्षत्युपेद् ददाति न स्वं मुषायति
भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुम्

ऋ. 6.28.2

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

न ता नंशन्ति न दंभाति तस्करो नासांमामित्रो व्यथिरा दंधर्षति
देवाँश्च याभिर्यजते ददाति च ज्योगित् ताभिः सचते गोपतिः सह
ऋ. 6.28.3

Page 339

न ता अर्वा रेणकंकाटो अश्नुते न संस्कृतत्रमुपं यन्ति ता अभि
उरुगायमभंयं तस्य ता अनु गावो मर्तस्य वि चंरन्ति यज्वनः
ऋ. 6.28.4

यूयं गांवो मेदयथा कृशं चिदश्रीरं चित् कृणुथा सुप्रतीकम्
भद्रं गृहं कृणुथ भद्रवाचो बृहद् वो वय उच्यते सभासु
ऋ. 6.28.6

प्रजावंतीः सूयवंसं रिशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः
मा वः स्तेन ईशत माघशंसः परि वो हेती रुद्रस्य वृज्याः
ऋ. 6.28.7

उपेदमुपपर्चनमासु गोषूप पृच्यताम्
उप ऋषभस्य रेतस्युपेन्द्र तवं वीर्ये
ऋ. 6.28.8

Page 340

वसंन्त इन्नु रन्त्यो ग्रीष्म इन्नु रन्त्यः
वर्षाण्यनु शरदो हेमन्तः शिशिरं इन्नु रन्त्यः
सा. 616

उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुरा विवेश
मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यन्ता
ऋ. 5.47.3

ग्रीष्मो हेमन्तः शिशिरो वसन्तः शरद् वर्षाः स्विते नो दधात
आ नो गोषु भजता प्रजायां निवात इद् वः शरणे स्याम
अ. 6.55.2

Page 342

शतं वो अम्ब धामानि सहस्रमुत वो रुहः
अधा शतक्रत्वो यूयमिमं मे अगदं कृत
ऋ. 10.97.2

ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः
ऋ. 10.97.3

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 343

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता
गोभाज इत किलासथ यत् सनवथ पूरुषम्
ऋ. 10. 97.5

यत्रौषधीः समग्मत राजानः समिताविव
विप्रः स उच्यते भिषग् रक्षोहामीवचातनः
ऋ. 10.97.6

यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः
ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव
ऋ. 10.97.12

जीवलां नघारिषां जीवन्तीमोषधीमहम्
अरुन्धतीमुन्नयन्तीं पुष्पां मधुमतीमिह हुवे ऽस्मा अरिष्टतातये
अ. 8.7.6

Page 344

शृणोतु न ऊर्जां पतिरूर्जः स नभस्तरीयाँ इषिरः परिज्मा
शृण्वन्त्वापः पुरो न शुभ्राः परि स्रुचो बबृहाणस्याद्रेः
ऋ. 5.41.12

Page 347

जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम्
सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ती
अ. 12.1.45

Page 348

उषसः पूर्वा अध यद् व्यूषुर्महद् वि जज्ञे अक्षरं पदे गोः
व्रता देवानामुप नु प्रभूषन् महद् देवानामसुरत्वमेकम्
ऋ. 3.55.1

मो षू णो अत्र जुहुरन्त देवा मा पूर्वे अग्ने पितरः पदज्ञाः
पुराण्योः सद्मनोः केतुरन्तर्महद् देवानामसुरत्वमेकम्
ऋ. 3.55.2

वि मे पुरुत्रा पतयन्ति कामाः शम्यच्छा दीद्ये पूव्याणि
समिद्धे अग्नावृतमिद् वदेम महद् देवानामसुरत्वमेकम्
ऋ. 3.55.3

समानो राजा विभृतः पुरुत्रा शये शयासु प्रयुतो वनानु
अन्या वत्सं भरति क्षेति माता महद् देवानामसुरत्वमेकम्
ऋ. 3.55.4

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 350

आक्षित् पूर्वास्वपरा अनूरुत् सद्यो जातासु तरुणीष्वन्तः
अन्तर्वतीः सुवते अप्रवीता महद् देवानामसुरत्वमेकम्
ऋ. 3.55.5

शयुः परस्तादध नु द्विमाता ऽबन्धनश्चरति वत्स एकः
मित्रस्य ता वरुणस्य व्रतानि महद् देवानामसुरत्वमेकम्
ऋ. 3.55.6

द्विमाता होता विदथेषु सम्राळन्वग्रं चरति क्षेति बुध्नः
प्र रण्यानि रण्यवाचो भरन्ते महद् देवानामसुरत्वमेकम्
ऋ. 3.55.7

शूरस्येव युध्यतो अन्तमस्य प्रतीचीनं ददृशे विश्वमायत्
अन्तर्मतिश्चरति निष्षिधं गोर्महद् देवानामसुरत्वमेकम्
ऋ. 3.55.8

नि वेवेति पलितो दूत आस्वन्तर्महांश्चरति रोचनेन
वपाषि बिभ्रदभि नो वि चष्टे महद् देवानामसुरत्वमेकम्
ऋ. 3.55.9

विष्णुर्गोपाः परमं पाति पाथः प्रिया धामान्यमृता दधानः
अग्निष्टा विश्वा भुवनानि वेद महद् देवानामसुरत्वमेकम्
ऋ. 3.55.10

Page 351

नाना चक्राते यम्याव वपूंषि तयोरन्यद् रोचते कृष्णमन्यत्
श्यावी च यदरुषी च स्वसारौ महद् देवानामसुरत्वमेकम्
ऋ. 3.55.11

माता च यत्र दुहिता च धेनू सबर्दुघे धापयेते समीची
ऋतस्य ते सदसीळे अन्तर्महद् देवानामसुरत्वमेकम्
ऋ. 3.55.12

अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः
ऋतस्य सा पयसापिन्वतेळा महद् देवानामसुरत्वमेकम्
ऋ. 3.55.13

पद्या वस्ते पुरुरूपा वपूंष्यूर्ध्वा तस्थौ त्र्यविं रेरिहाणा
ऋतस्य सद्म वि चरामि विद्वान् महद् देवानामसुरत्वमेकम्
ऋ. 3.55.14

पदे इव निहिते दस्मे अन्तस्तयोरन्यद् गुह्यमाविरन्यत्
सधीचीना पथ्याव सा विषूची महद् देवानामसुरत्वमेकम्
ऋ. 3.55.15

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 421

यः पुष्पिणीश्च प्रस्वश्च धर्मणा ऽधि दाने व्यृवनीरधारयः
यश्चास मा अजनो दिद्युतो दिव उरुरूर्वी अभितः सास्युक्थ्यः
ऋ. 2.13.7

Page 422

यो अक्रन्दयत् सलिलं महित्वा योनिं कृत्वा त्रिभुजं शयानः
वत्सः कामदुघो विराजः स गुहा चक्रे तन्वः पराचैः
अ. 8.9.2

श्येनः क्रोडोऽन्तरिक्षं पाजस्यं बृहस्पतिः ककुद् बृहतीः कीकसाः
अ. 9.7.5

यानि नक्षत्राणि दिव्यन्तरिक्षे अप्सु भूमौ यानि नगेषु दिक्षु
प्रकल्पयंश्चन्द्रमा यान्येति सर्वाणि ममैतानि शिवानि सन्तु
अ. 19.8.1

अष्टाविंशानि शिवानि शग्मानि सह योगं भजन्तु मे
योगं प्र पद्ये क्षेमं च क्षेमं प्र पद्ये योगं च नमोऽहोरात्राभ्यामस्तु
अ. 19.8.2

Page 423

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः
पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः
सा. 547

अहमिन्द्रो न परा जिग्य इद्धनं न मृत्यवेऽवं तस्थे कदा चन
सोममिन्मा सुन्वन्तो याचता वसु न मे पूरवः सख्ये रिषाथन
ऋ. 10.48.5

अभिष्टने ते आद्रिवो यत् स्था जगच्च रेजते
त्वष्टा चित् तव मन्यव इन्द्र वेविज्यते भियार्चन्ननु स्वराज्यम्
ऋ. 1.80.14

Page 424

अजोऽह्यग्नेरजनिष्ट शोकात् सो अपश्यज्जनितारमग्नेः
तेन देवा देवतामग्र आयन् तेन रोहान् रुरुहुर्मेध्यासः
अ. 4.14.1

क्रमध्वमग्निना नाकमुख्यान् हस्तेषु बिभ्रतः
दिवस्पृष्ठं स्व र्गत्वा मिश्रा देवेभिराध्वम्
अ. 4.14.2

पञ्चौदन पञ्चभिरङ्गुलिभिर्दव्योद्धर पञ्चधैतमोदनम्
प्राच्यां दिशि शिरो अजस्य धेहि दक्षिणायां दिशि दक्षिणं धेहि पार्श्वम्
अ. 4.14.7

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

आ यो धर्माणि प्रथमः ससाद ततो वपूंषि कृणुषे पुरूणि
धास्युर्योनिं प्रथम आ विवेशा यो वाचमनुदितां चिकेत
अ. 5.1.2

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः
पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः
अ. 20.137.4

Page 425

सोमस्य त्विषिरसि तेवेव मे त्विषिर्भूयात्
मृत्योः पाह्योजोऽसि सहोऽस्यमृतमसि
सा. 10.15

प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने
सꣳसृज्य मातृभिष्ट्वं ज्योतिष्मान् पुनरा ऽसदः
सा. 12.38

पुनरासद्य सदनमपश्चं पृथिवीमग्ने
शेषे मातुर्यथोपस्थेऽन्तरस्याꣳ शिवतमः
य. 12.39

वायोः पूतः पवित्रेण प्रत्यङ् सोमो अति द्रुतः
इन्द्रस्य युज्यः सखा
अ. 6.51.1

मृत्योरहं ब्रह्मचारी यदस्मि निर्याचन् भूतात् पुरुषं यमाय
तमहं ब्रह्मणा तपसा श्रमेणानयैनं मेखलया सिनामि
अ. 6.133.3

श्रद्धायां दुहिता तपसोऽधि जाता स्वस ऋषीणां भूतकृतां बभूव
सा नो मेखले मतिमा धेहि मेधामथो नो धेहि तप इन्द्रियं च
अ. 6.133.4

Page 426

यद् दुष्कृतं यच्छमलं यद् वा चेरिम पापया
त्वया तद् विश्वतोमुखापामार्गाप मृज्महे
अ. 7.65.2

पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनु पञ्च
पञ्च दिशः पञ्चदशेन क्लृप्तास्ता एकमूध्नीरभि कोकमेकम्
अ. 8.9.15

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

सप्त होमाः समिधो ह सप्त मधूनि सप्तर्तवो ह सप्त
सप्ताज्यानि परि भूतमायन् ताः संप्तगृध्रा इति शुश्रुमा वयम्
अ. 8.9.18

सप्त च्छन्दांसि चतुरुत्तराण्यन्यो अन्यस्मिन्नध्यार्पितानि
कथं स्तोमाः प्रति तिष्ठन्ति तेषु तानि स्तोमेषु कथमार्पितानि
अ. 8.9.19

Page 427

कथं गायत्री त्रिवृतं व्याप्ति कथं त्रिष्टुप् पञ्चदशेन कल्पते
त्रयस्त्रिंशेन जगती कथमनुष्टुप् कथमेकविंशः
अ. 8.9.20

अष्ट जाता भूता प्रथमजर्तस्याष्टेन्द्रर्त्विजो दैव्या ये
अष्टयोनिरदितिरष्टपुत्राष्टमीं रात्रिमभि हव्यमेति
अ. 8.9.21

न वै तं चक्षुर्जहाति न प्राणो जरसः पुरा
पुरं यो ब्रह्मणो वेद यस्याः पुरुष उच्यते
अ. 10.2.30

Page 428

अष्टाचक्रा नवद्वारा देवानां पूरयोध्या
तस्यां हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः
अ. 10.2.31

तस्मिन् हिरण्यये कोशे त्र्यरि त्रिप्रतिष्ठिते
तस्मिन् यद् यक्षमात्मन्वत् तद् वै ब्रह्मविदो विदुः३
अ. 10.2.32

इमौ युनज्मि ते वह्नी असुनीताय वोढवे
ताभ्यां यमस्य सादनं समितीश्चावं गच्छतात्
अ. 18.2.56

हरिः सुपर्णो दिवमारुहोऽर्चिषा ये त्वा दिप्सन्ति दिवमुत्पतन्तम्
अव तां जहि हरसा जातवेदोऽबिभ्यदुग्रोऽर्चिषा दिवमा रोह सूर्य
अ. 19.65.1

Page 429

को अस्य बाहू समभरद् वीर्या करवादिति
अंसौ को अस्य तद् देवः कुसिन्धे अध्या दधौ
अ. 10.2.5

कः सप्त खानि वि ततर्द शीर्षणि कर्णाविमौ नासिके चक्षणी मुखम्
येषां पुरुत्रा विजयस्य मह्मनि चतुष्पादो द्विपदो यन्ति यामम्
अ. 10.2.6

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

हन्वोर्हि जिह्वामदधात् पुरूचीमधा महीमधि शिश्राय वाचम्
स आ वरीवर्ति भुवनेष्वन्तरपो वसानः क उ तच्चिकेत
अ. 10.2.7

मस्तिष्कमस्य यतमो ललाटं ककाटिकां प्रथमो यः कपालम्
चित्वा चित्यं हन्वोः पूरुषस्य दिवं रुरोह कतमः स देवः
अ. 10.2.8

यथा द्यां च पृथिवीं चान्तस्तिष्ठति तेजनम्
एवा रोगं चास्रावं चान्तस्तिष्ठतु मुञ्ज इत्
अ. 1.2.4

Page 430

विषितं ते वस्तिबिलं समुद्रस्योदधेरिव
एवा ते मूत्रं मुच्यतां बहिर्बालितिं सर्वकम्
अ. 1.3.8

अमूर्या यन्ति योषितो हिरा लोहितवाससः
अभ्रातर इव जामयस्तिष्ठन्तु हतवर्चसः
अ. 1.17.1

शुकेषु ते हरिमाणं रोपणाकासु दध्मसि
अथो हारिद्रवेषु ते हरिमाणं नि दध्मसि
अ. 1.22.4

नक्तंजातास्योषधे रामे कृष्णे असिक्नि च
इदं रजनि रजय किलासं पलितं च यत्
अ. 1.23.1

श्यामा संरूपंकरणी पृथिव्या अध्युद्भृता
इदमू षु प्र साधय पुनां रूपाणि कल्पय
अ. 1.24.4

येन वेहद् बभूविथ नाशयामसि तत् त्वत्
इदं तदन्यत्र त्वदप दूरे नि दध्मसि
अ. 3.23.1

आ ते योनिं गर्भ एतु पुमान् बाण इवेषुधिम्
आ वीरोऽत्र जायतां पुत्रस्ते दशमास्यः
अ. 3.23.2

Page 431

यानि भद्राणि बीजान्यृषभा जनयन्ति च
तैस्त्वं पुत्रं विन्दस्व सा प्रसूर्धेनुका भव
अ. 3.23.4

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

उदुषा उदु सूर्य उदिदं मामकं वचः
उदेजतु प्रजापतिर्वृषा शुष्मेण वाजिना
अ. 4.4.2

यस्त आस्यत् पञ्चाङ्गुरिर्वक्राच्चिदधि धन्वनः
अपस्कम्भस्य शल्यान्निरवोचमहं विषम्
अ. 4.6.4

शल्याद् विषं निरवोचं प्राञ्जनादुत पर्णधेः
अपाष्ठाच्छृङ्गात् कुल्मलान्निरवोचमहं विषम्
अ. 4.6.5

रोहण्यसि रोहण्यस्थश्छिन्नस्य रोहणी। रोहयेदमरुन्धति
अ. 4.12.1

अयं मे हस्तो भगवानयं मे भगवत्तरः
अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः
अ. 4.13.6

Page 432

हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी
अनामयित्नुभ्यां हस्ताभ्यां ताभ्यां त्वाभि भृशामसि
अ. 4.13.7

यां ते चक्रुरामे पात्रे यां चक्रुर्नीललोहिते
आमे मांसे कृत्यां यां चक्रुस्तया कृत्याकृतो जहि
अ. 4.17.4

अपामार्ग ओषधीनां सर्वासामेक इद् वशी
तेन ते मृज्म आस्थितमथ त्वमगदश्चर
अ. 4.17.8

गुल्गुलूः पीलां नलद्यौरिक्षगन्धिः प्रमन्दनी
तत् परेताप्सरसः प्रतिबुद्धा अभूतन
अ. 4.37.3

भीमा इन्द्रस्य हेतयः शतमृष्टीरयस्मयीः
ताभिर्हविरदान् गन्धर्वानवकादान् व्यृषितु
अ. 4.37.8

यस्ते हन्ति पतयन्तं निषत्स्नु यः संरीसृपम्
जातं यस्ते जिघांसति तमितो नाशयामसि
अ. 20.96.13

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 433

रात्री माता नभः पितार्यमा तं पितामहः
सिलाची नाम वा असि सा देवानामसि स्वसा
अ. 5.5.1

भद्रात् प्लक्षान्निस्तिष्ठस्यश्वत्थात् खदिराद्ध्वात्
भद्रान्न्यग्रोधात् पर्णात् सा न एह्यरुन्धति
अ. 5.5.5

हिरण्यवर्णे सुभगे सूर्यवर्णे वपुष्टमे
रुतं गच्छासि निष्कृते निष्कृतिर्नाम वा असि
अ. 5.5.6

तथा तदग्ने कृणु जातवेदो विश्वेभिर्देवैः सह संविदानः
यो नो दिदेव यतमो जघास यथा सो अस्य परिधिष्पताति
अ. 5.29.2

यदस्य हतं विहतं यत् पराभृतमात्मनो जग्धं यतमत् पिशाचैः
तदग्ने विद्वान् पुनरा भर त्वं शरीरं मांसमसुमेरयामः
अ. 5.29.5

आमे सुपक्वे शबले विपक्वे यो मा पिशाचो अशने ददम्भ
तदात्मा प्रजया पिशाचा वि यातयन्तामगदोऽयमस्तु
अ. 5.29.6

यां ते चक्रुरामे पात्रे यां चक्रुर्मिश्रधान्ये
आमे मांसे कृत्यां यां चक्रुः पुनः प्रति हरामि ताम्
अ. 5.31.1

Page 434

मध्वा पृञ्चे नद्यः पर्वता गिरयो मधु
मधु परुष्णी शीपाला शमास्ने अस्तु शं हृदे
अ. 6.12.3

विद्रधस्य बलासस्य लोहितस्य वनस्पते
विसल्पकस्योषधे मोच्छिषः पिशितं चन
अ. 6.127.1

यौ ते बलास तिष्ठतुः कक्षे मुष्कावपाश्रितौ
वेदाहं तस्य भेषजं चीपुद्रुरभिचक्षणम्
अ. 6.127.2

अरसस्य शर्कोटस्य नीचीनस्योपसर्पतः
विषं ह्यस्यादिष्यथो एनमजीजभम्
अ. 7.56.5

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अपचितां लोहिनीनां कृष्णा मातेति शुश्रुम
मुनेर्देवस्य मूलेन सर्वा विध्यामि ता अहम्
अ. 7.74.1

विध्याम्यासां प्रथमां विध्याम्युत मध्यमाम्
इदं जघन्यामासामा च्छिनद्मि स्तुकामिव
अ. 7.74.2

यौ ते मातोन्मार्जं जातायाः पतिवेदनौ
दुर्णामा तत्र मा गृधदलिंश उत वत्सपः
अ. 8.6.1

Page 435

पलालानुपलालौ शर्कुं कोकं मलिम्लुचं पलीजकम्
आश्रेषं वव्रिवाससमृक्षग्रीवं प्रमीलिनम्
अ. 8.6.2

मा सं वृतो मोप सृप उरु मावं सृपोऽन्तरा
कृणोम्यस्यै भेषजं वजं दुर्णामचातनम्
अ. 8.6.3

या बभ्रवो याश्च शुक्रा रोहिणीरुत पृश्नयः
असिक्नीः कृष्णा ओषधीः सर्वा अच्छावदामसि
अ. 8.7.1

त्रायन्तामिमं पुरुषं यक्ष्माद् देवेषितादधि
यासां द्यौष्पिता पृथिवी माता समुद्रो मूलं वीरुधां बभूव
अ. 8.7.2

अवकोल्वा उदकात्मान ओषधयः। व्यृषन्तु दुरितं तीक्ष्णशृङ्गयः
अ. 8.7.9

उन्मुञ्चन्तीर्विवरुणा उग्रा या विषदूषणीः
अथो वलासनाशनीः कृत्यादूषणीश्च यास्ता इहा यन्त्वोषधीः
अ. 8.7.10

दर्भः शोचिस्तरूणकमश्वस्य वारः पुरुषस्य वारः। रथस्य बन्धुरम्
अ. 10.4.2

Page 436

कैरातिका कुमारिका सका खनति भेषजम्
हिरण्ययीभिरभ्रिभिर्गिरीणामुप सानुषु
अ. 10.4.14

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तौदी नामासि कुन्या घृताची नाम वा असि
अधस्पदेन ते पदमा ददे विषदूषणम्
अ. 10.4.24

अङ्गादङ्गात् प्र च्यावय हृदयं परि वर्जय
अधा विषस्य यत् तेजोऽवाचीनं तदेतु ते
अ. 10.4.25

आशरीकं विशरीकं बलासं पृष्ट्यामयम्
तक्मानं विश्वशारदमरसां जङ्गिडस्करत्
अ. 19.34.10

ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः
अमीवा यस्ते गर्भं दुर्णामा योनिमाशये
अ. 20.96.11

यस्ते गर्भममीवा दुर्णामा योनिमाशये
अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत्
अ. 20.96.12

वध्रयस्ते खनितारो वध्रिस्त्वमस्योषधे
वध्रिः स पर्वतो गिरिर्यतो जातमिदं विषम्
अ. 21.6.8

Page 437

वायुष्ट्वा ब्रह्मणा पात्विन्द्रस्त्वा पात्विन्द्रियैः
अ. 19.27.1

विश्वे देवा अशृण्वन्तु न्युप्तो विष्णुराप्रीतपा आप्याय्यमानो
यमः सूयमानो विष्णुः सम्भ्रियमाणो वायुः पूयमानः
शुक्रः पूतः शुक्रः क्षीरश्रीर्मन्थी सक्तुश्रीः
य. 8.57

यो अग्निरग्नेरध्यजायत शोकात्पृथिव्या उत वा दिवस्परि
येन प्रजा विश्वकर्मा जजान तमग्ने हेडः परि ते वृणक्तु
य. 13.45

नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च
य. 16.38

इन्द्रवायू इमे सुता उप प्रयोभिरा गतम्। इन्दवो वामुशन्ति हि
य. 33.56

अनड्वाहमन्वारभामहे सौरभेयꣳ स्वस्तये
स न इन्द्र इव देवेभ्यो वह्निः सन्तारणो भव
य. 35.13

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 438

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे
वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे श्यामं च मे लोहं च मे
सीसं च मे त्रपु च मे यज्ञेन कल्पन्ताम्

य. 18.13

तपसे कौलालं मायायै कर्मारꣳ रूपाय मणिकारꣳ
शुभे वपꣳ शरव्याया इषुकारꣳ हेत्यै धनुष्कारं कर्मणे ज्याकारँ
दिष्टाय रज्जुसर्ज मृत्यवे मृगयुमन्तकाय श्वनिनम्

य. 30.7

ये पन्थानो बहवो देवयानाः अन्तरा द्यावापृथिवी संचरन्ति
ते मा जुषन्तां पयसा घृतेन यथा क्रीत्वा धनमाहराणि

अ. 3.15.2

आयने ते परायणे दूर्वा रोहतु पुष्पिणीः
उत्सो वा तत्र जायतां ह्रदो वा पुण्डरीकवान्

अ. 6.106.1

Page 439

उपमितां प्रतिमितामथो परिमितामुत
शालाया विश्ववाराया नद्धानि वि चृतामसि

अ. 9.3.1

आ यामं सं ववर्ह ग्रन्थींश्चकार ते दृढान्
परूंषि विद्वांछस्तेवेन्द्रेण वि चृतामसि

अ. 9.3.3

हतं तर्द संमङ्क्ष्माखुमश्विना छिन्तं शिरो अपि पृष्टीः शृणीतम्
यवान्नेददानपि नह्यतं मुखमथाभयं कृणुतं धान्याय

अ. 6.50.2

तर्द हे पतङ्ग हे जभ्य हा उपक्वस
ब्रह्मेवासंस्थितं हविरनदन्त इमान् ववानहिंसन्तो अपोदित

अ. 6.50.2

तदीपते ववापते तृष्टजम्भा आ शृणोत मे
य आरण्या व्यद्रिरा ये के च स्थ व्यद्रिरास्तान्त्सर्वान् जम्भयामसि

अ. 6.50.3

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Page 440

यः पौरुषेयेण क्रविषा समङ्क्ते यो अश्व्येन पशुना यातुधानः
यो अघ्न्याया भरति क्षीरमग्ने तेषा शीर्षाणि हरसापि वृश्च
अ. 8.3.15

विषं गवा यातुधाना भरन्ता मा वृश्चन्तामदितये दुरेवाः
परैणान् देवः सविता ददातु परा भागमोषधीनां जयन्ताम्
अ. 8.3.16

अवकोल्वा उदकात्मान ओषधयः। व्यृषिन्तु दुरितं तीक्ष्णशृङ्ग्याः
अ. 8.7.9

रक्षोहणं वलगहनं वैष्णवीमिदमहं तं वलगमुत्किरामि
यं मे निष्ट्यो यममात्यो निचखानेदमहं
य. 5.23

Page 441

प्रतूर्त्तं वाजिन्ना द्रव वरिष्ठामनु संवतम्
दिवि ते जन्म परममन्तरिक्षे तव नाभिः पृथिव्यामधि योनिरित्
य. 11.12

युञ्जाथाछ रासभं युवमस्मिन् यामे वृषण्वसू। अग्निं भरन्तमस्मयुम्
य. 11.13

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः
तेषाछ सहस्रयोजनेऽव धन्वानि तन्मसि
य. 16.61

रथवाहणछ हविरस्य नाम यत्रायुधं निहितमस्य वर्म
तत्रा रथमुप शग्मछ सदेम विश्वाहा वयछ सुमनस्यमानाः
य. 29.45

त्रीणि शता त्री सहस्राण्यग्निं त्रिछशच्चं देवा नव चासपर्यन्
य. 33.7

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

CC-0. In Public Domain. Funding by IKS-MoE